अनन्तशयनसंस्कृतग्रन्थावलिः— ग्रन्थाङ्कः २२२

पौरस्त्यभाषागवेषणहस्तलिखितग्रन्थप्रसाधनकार्यालयः

केरलविश्वविद्यालयः

अङ्कणशास्त्रम्

प्रसाधकः

डाक्टर्. के. राघवन् पिळ्ळ

पौरस्त्यभाषागवेषणहस्तलिखितग्रन्थप्रसाधनकार्यालयाध्यक्षः ।

१९६८/११४४

अनन्तशयने एस्. वी. जी. मुद्रणालये मुद्रितम् ।]   [मूल्यं रूप्यकद्वयम्

INTRODUCTION

It is well known that Kerala has produced many independent and original works in all branches of Indian Astronomy. In astrology while Varāhamihira's Horāsāstra is widely accepted as the standard treatise, in Kerala there are other works which are in equally current use. Among other works concerning horoscopic predictions, such as the अंशकफलविचार etc. the present work अङ्कणशास्त्र (Aṅkaṇasāstra) is unique and is an important guide to the astrologers.

This Aṅkaṇasāstra is over and above the पूर्वशास्त्र in all matters connected with the casting of a horoscope and predicting fortunes. For a more precise and accurate prediction of fortunes, the author says, the following of this Aṅkaṇasāstra also is essential. Accepting all the fundamentals, 27 constellations of stars, the 12 zodiacal signs Aries etc., all the अंशका-s etc., the author brings in new divisions in a Rāsi or zodiacal sign – "नवभागात्मकं लग्नं तेषामीशः पृथक् पृथक्" "अस्मिन् शास्त्रे ग्रहाणां तु स्थानं तु नवधा कृतम्-"

Each one of these nine parts of a Rāsi is called an अङ्कण (Aṅkaṇa) and the lordship of these nine Aṅkaṇas is given to the nine heavenly bodies, Mars, Jupiter, Mercury, Moon, Sun, Rāhu, Venus, Ketu and Saturn respectively. A planet occuring in any one of these nine courtyards (अङ्कण) is supposed to be in a particular mood, so that these Aṅkaṇas may be considered to be the nine moods– 1st स्वभावेन संस्थितः (in tranquility), 2nd व्यवहारं प्रकुर्वते (in conversation), 3rd शयिता स्युः (sleeping), 4th स्नानं कुर्वन्ति (bathing), 5th भुक्तिकालः

प्रकीर्तितः (dining), 6th स्त्रीभिर्विहरन्ति (in amorous sports), 7th मन्त्रालोचनतत्पराः (interested in consultation and resolution), 8th व्यसनेन समन्विताः (in melancholy mood) and the 9th राजकार्यविचारिणः (reflecting on state affairs). A planet in a particular mood gives a decisive effect or brings about a definite result in the life of the native of the horoscope. For example–

सम्पूर्णबिन्दुयुक्तेऽपि लग्नेशे स्वर्क्षगेऽपि वा ।
शुभग्रहयुतो वापि दुश्चरित्रे विनश्यति ॥
(19th stanza I chapter)

It means that even though the लग्नेश is very strong in all respects, if it happens to be in an evil Aṅkaṇa the longevity is practically nil.

The first chapter including the introductory portion contains 128 verses and describes the consequences due to the position of the planets in the nine Aṅkaṇas. The 2nd and 3rd chapters containing 14 and 77 verses respectively, describe the resultant effects when combinations of planets occur in each Aṅkaṇa. The rest of the chapters deal with आयुर्भावनिर्णयः बालारिष्टम्, दत्तपुत्रभावः, शान्तिकल्पः, ग्रहयोगाः, लग्ननिर्णयः and सूक्ष्माङ्कणफलम् altogether in 170 stanzas.

From the colophon at the finis "इति व्याघ्रपादोक्तः नवग्रहसमयः समाप्तः" it is clear that "नवग्रहसमयः" would have been a more modest title of the work. For it is really a new convention regarding the positions and moods of the nine planets in the nine conventional houses or Aṅkaṇas. It is also evident that the concept of this convention first originated from one व्याघ्रपाद probably a sage who orally transferred this शास्त्र to his desciples. The author puts this fact vividly in stanza 19 of the last chapter—"इत्येवं व्याघ्रपादेन समुदीरितमीरितम्" It seems that व्याघ्रपाद has been a divinity by his "शेषांशेन समुद्भवः"

The opening stanza or the benedictory verse

व्याघ्रपादमहं वन्दे शेषांशेन समुद्भवम् ।
पुण्डरीकपुरीशस्य पदपङ्कजसंश्रयः ॥

shows that the author of this work is a devotee of the deity enshrined in the Vaikom Temple in the erstwhile Central Travancore. No more details of the author or the sage व्याघ्रपाद are available.

This publication Trivandrum Sanskrit Series No. 222 is based on a single paper manuscript T. 206 written in Devanagari script, published serially in the Sanskrit Journals Vol. X Nos. 3 & 4 in the year 1960.

Sri. A. Ramachandra Sastri, Research Officer in this Department prepared the Press Copy of this work. Sri. M. Madhavan Unni, and Sri. V. Narayanan Namboodiri, Assistant Research Officers assisted me in the various stages of the publication of the work.

Trivandrum,
25-5-'68.

K. Raghavan Pillai,
Director.

॥ श्री ॥

अङ्कणशास्त्रम्

व्याघ्रपादमहं वन्दे शेषांशेन समुद्भवम् ।
पुण्डरीकपुरीशस्य पदपङ्कजसंश्रयः ॥ १ ॥

शृण्वन्तु मुनयः सर्वे दुरूहं सर्वदैवतैः ।
ग्रहाणां समयं व्यग्रं वक्ष्यामि मतिमात्रतः ॥ २ ॥

तारकाः सप्तत्रिंशत्यो(?) राशयो द्वादश स्मृताः ।
तत्रैकस्य द्विनक्षत्रं सपादं समुदाहृतम् ॥ ३ ॥

तासां सङ्ख्याविशेषेण मेष इत्यादिनामतः ।
नवभागात्मकं लग्नं तेषामीशाः पृथक् पृथक् ॥ ४ ॥

राशीनां पूर्वशास्त्रे तु सप्त नाथाः प्रकीर्तिताः ।
सितासितगुरुज्ञारा द्विद्विराश्यधिपाः स्मृताः ॥ ५ ॥

दिनेशचन्द्रयोरेकं कथितं पूर्वसूरिभिः ।
अस्मिन् शास्त्रे ग्रहाणां तु स्थानं तु नवधा कृतम् ॥ ६ ॥

आद्यङ्कणस्याधिपतिर्भूमिसूनुः प्रकीर्तितः ।
वाचस्पतिर्द्वितीयस्य तृतीयस्य बुधः स्मृतः ॥ ७ ॥

चतुर्थाङ्कणपश्चन्द्रः पञ्चमाङ्कणपो रविः ।
षष्ठाङ्कणाधिपो राहुः सप्तमाङ्कणपः कविः ॥ ८ ॥

अष्टमाङ्कणपः केतुर्नवमाङ्कणपः शनिः ।
आद्यङ्कणगताः सर्वे स्वभावेनैव संस्थिताः ॥ ९ ॥

द्वितीयचत्वरगता व्यवहारं प्रकुर्वते ।
तृतीयमङ्कणं प्राप्ताः शयिताः स्युर्न संशयः ॥ १० ॥

चतुर्थमङ्कणं प्राप्ताः स्नानं कुर्वन्ति सर्वतः ।
पञ्चमाङ्कणगानां तु भुक्तिकालः प्रकीर्तितः ॥ ११ ।

षष्ठाङ्कणगताः स्त्रीभिर्विहरन्ति सकौतुकाः ।
सप्तमाङ्कणगास्सर्वे मन्त्रालोचनतत्पराः ॥ १२ ॥

अष्टमाङ्कणगाः खेटा व्यसनेन समन्विताः ।
अङ्कणं नवमं प्राप्ता राजकार्यविचारिणः । १३ ॥

इयमेव चरी स्थूला ग्रहयोगे चरी पृथक् ।
तज्ज्ञात्वा जातकफलं प्रवदन्ति हि पण्डिताः ॥ १४ ॥

शृण्वन्तु परमं सूक्ष्ममङ्कणं नवधा कृतम् ।
ज्ञात्वा दशाफलं सर्वं पूर्वशास्त्रानुसारतः ॥ १५ ॥

लग्नं लग्नाधिपं चैव नवांशं च यथामति ।
ज्ञात्वा ग्रहाणां समयं फलं वक्ष्यन्ति पूर्विकाः ॥ १६ ॥

गोचरं पूर्वशास्त्रं च समयं च दशादिकम् ।
सर्वं विचार्य वक्तव्यं जातस्य मरणादिकम् ॥ १७ ॥

एतेषु मध्ये चरितमरिष्टं प्रवदन्ति च ।
लग्नेशस्य चरीं ज्ञात्वा वयः प्राहुर्मनीषिणः ॥ १८ ॥

सम्पूर्णबिन्दुयुक्तेऽपि लग्नेशे स्वर्क्षगेऽपि वा ।
शुभग्रहयुतो वापि दुश्चरित्रे विनश्यति ॥ १९ ॥

दशाविपाके द्रष्टव्यं सूक्ष्ममुक्तं विशेषतः ।
जातके स्थूलसमयं ग्रहयोगागतं च यत् ॥ २० ॥

तदेव खलु वक्तव्यं न प्रयासश्रमाय च ।
लग्नं होरा च द्रेकाणं सप्तांशं च नवांशकम् ॥ २१ ॥

दशांशं द्वादशांशं च त्रिंशांशं च द्विधा कृतम् ।
वर्गसंश्रयणं चैव दशाभुक्तिस्तु सूक्ष्मतः ॥ २२ ॥

जातकस्य फलं ब्रूमो ह्यन्यथा न फलन्ति ते ।
ग्रहाणां प्रार्थनां कृत्वा ताम्बूलादि निवेद्य च ॥ २३ ॥

वदध्वमृषयो यूयमन्यथा न फलप्रदाः ।
शापं दास्यन्ति वक्तुस्तु वदन्त्वेषां निवेद्य च ॥ २४ ॥

स्वस्थस्तु कुरुते सौख्यमायुर्दैर्ध्यं च पालनम् ।
वाहनं पुत्रसम्पच्च बन्धुपूज्यत्वमेव च ॥ २५ ॥

अङ्कणे देवपूज्यस्य संस्थिता ये खगाः सदा ।
मध्यमायुःप्रदास्ते तु सर्वकार्ये तु मध्यमाः ॥ २६ ॥

इन्दुजस्याङ्कणे प्राप्ताः निद्रया हृतचेतसः ।
न करोति फलं किञ्चिच्छुभं वा यदि वाशुभम् ॥ २७ ॥

शीतांशोरङ्कणं प्राप्ताः शुभदा यदि खेचराः ।
तत्पाके राजपूज्यत्वं शीतवातादिरोगदाः ॥ २८ ॥

पित्राधिकः पितृसमश्चिरकालभोगी
दीर्घायुरेति रविरङ्कणगस्तु खेटः ।
बन्धुप्रियो वाहनवित्तवान् स्या-
च्चिरेण सर्वं कुरुतेऽतिलालसः ॥ २९ ॥

अतीव हृष्टो बहुपुत्रभाग्यो
वित्तेशतुल्यो बलवान् कृशाङ्गः ।

रोगी सदाचारसुतान्वितोऽभूत्
पित्रादिमान्यो नृपतुल्यवृत्तिः ॥ ३० ॥

सितस्य मन्त्रे (?) यदि जातकोऽभू-
न्मन्त्री गुणाढ्यो बहुदेशभाक् च ।
ज्ञानी पदातिः प्रभुमानितश्च
क्वचित् सुखी दारविहीनवृत्तिः ॥ ३१ ॥

दीर्घवैरी सदा रोगी बन्धुद्वेषी ध्वजाङ्कणे ।
परदारगृहीतश्च जायते वित्तभूमिहा ॥ ३२ ॥

पदातिः पद्मवदनो वाचाटो मेहरोगवान् ।
कुशीलः कुलविद्वेषी जायते पङ्गुरङ्कणे ॥ ३३ ॥

ये सुधांशुयुताः खेटाः सम्पूर्णफलदायकाः
अथापि भोजने काले राजयोगफलप्रदाः ॥ ३४ ॥

लग्ने नवांशे सुरलोकवन्द्यो
लग्नेऽथवा जीवति जातकः सुखी ।
आद्यङ्कणश्चेच्छकटादिदोषान्
निहत्य पञ्चोत्तरसप्तति व्रजेत् ॥ ३५ ॥

नीचे सुधांशौ यदि भोजनं चेत्
पञ्चाशदब्दान् प्रवदन्ति पण्डिताः ।
स्वस्थे फणौ लग्ननवांशके वा
वर्षाणि षट्सप्तति जीवतीति ॥ ३६ ।

गुरुशुक्रौ स्वभावस्थौ कुर्वाते कर्मठं शिशुम् ।
सर्वतन्त्रेषु कुशलं सुपुत्रं सुकलत्रकम् ॥ ३७ ॥

वाचस्प(ताव?तेर)ङ्कणसंस्थिताश्चे-
दल्पायुषं कुर्वति (?) जातकं शुभाः ।
दारिद्र्यदाः कुत्सितजीवनं च
कुर्वन्ति पापाः कुलहीनवृत्तिम् ॥ ३८ ॥

स्वोच्चेऽपि सुप्ते न फलप्रदाः स्युः
खेटाः कदाचिद् गुरुशुक्रयुक्ताः ।
वर्गोत्तमाश्चापि दशाविपाके
पापान्वितास्ते स्युरतीव मारकाः ॥ ३९ ॥

पापा वा यदि वाऽपापास्तुरीये चन्द्रसंयुताः ।
त्रिंशद्वर्षात्परं सौख्यमथवा पञ्चविंशतेः ॥ ४० ॥

दिनेशे स्वाङ्कणे मन्दयुक्ते ज्ञसहिते नरः ।
सर्वज्ञः पञ्चचत्वारि वर्षाणि सुमहामतिः ॥ ४१ ॥

यदि राह्वङ्कणं खेटाः प्राप्ताः कुर्वन्ति जातकम् ।
नवत्यब्दायुषं भोगी पुत्रपौत्रप्रतापवान् ॥ ४२ ॥

मन्दे जातस्तु दुश्शीलो नराणामधमो भवेत् ।
सर्वदा रोगशीलश्च विंशत्यब्दान् स जीवति ॥ ४३ ॥

यदि जीवति दुष्टात्मा मिथ्यावञ्चनतत्परः ।
सर्वेषामपकारी च सर्वकर्माणि निष्ठुरः ॥ ४४ ॥

खेदे जातो दरिद्रः स्यात् सर्वदा क्लेशजीवनः ।
भारवाही नरो दुष्टो नीचसेवारतो भवेत् ॥ ४५ ॥

शुभग्रहैर्बलाढ्यस्तु कष्टेन स जीवति ।
भिक्षामपि न दास्यन्ति बान्धवाश्च नराधमः ॥ ४६ ॥

जातः पङ्ग्वङ्कणे भोगी दीर्घाङ्गो दीर्घवैरकः।
परदाररतः कान्तो राजसेवापरः सुखी ॥ ४७ ॥

नीचो वा बिन्दुहीनो वा भूमिजस्याङ्कणे रविः।
बलवान् प्रदिशत्यायुः पुत्रपौत्रादिसम्पदम् ॥ ४८ ॥

वाचस्पत्यङ्कणे सूर्ये जातो दुष्टो दरिद्रकः।
भिक्षामटन् विदेशस्थो विषदष्टो म्रियेत सः ॥ ४९ ॥

सौम्याङ्कणे रवौ जातः खलो दुष्टो नराधमः।
निद्रालुर्विषवैद्यश्च सदा वदति दुष्टवाक् ॥ ५० ॥

विधोरङ्कणगे सूर्ये स्नानाचाररतो नरः।
दरिद्रः कर्मशीलश्च स्वल्पपुत्रः प्रवासकृत् ॥ ५१ ॥

दिनेशे स्वाङ्कणे जातो विद्वान् ज्योतिषवाक् सुखी।
पित्र्यादिपूर्विकैस्तुल्यः शुभयोगे गुणाधिकः ॥ ५२ ॥

राहोरङ्कणगे सूर्ये पुत्रपौत्रादिसम्पदः।
प्राप्नुवन्ति नरो गर्भश्रीमान् सत्त्वरतः सुखी ॥ ५३ ॥

कुबेरङ्कणगे सूर्ये तत्पाकेषु फलप्रदः।
नेतरेषु महापापी सर्वं नष्टं करिष्यति ॥ ४४ ॥

केतोरङ्कणगे सूर्ये पितृहीनोऽतिदुःखितः।
भिक्षाशी पितृमातृभ्यां हीनः पान्थः स जीवति ॥ ५५ ॥

शन्यङ्कणे रवौ जातो नीचसेवी मृषान्वितः।
शुभग्रहेण संयुक्ते बहुपुत्रो दरिद्रकः ॥ ५६ ॥

चन्द्रे भौमाङ्कणे जातः सुन्दराङ्गो महाबली।
कृशाङ्गः पित्तदेही च विद्वज्जनरतो भवेत् ॥ ५७ ॥

शशाङ्के देवपूज्यस्य भागे जातो महामतिः ।
अतिदीर्घतनुः कामी दरिद्रो जायते नरः ॥५८॥

बुधाङ्कणे शशाङ्के तु जायते वेदपारगः ।
शास्त्रवित् सर्वभीतश्च वचो वदति न क्वचित् ॥५९॥

स्वाङ्कणे तु निशानाथे मात्रा पित्रा च संयुतः ।
स्वयं विद्वान् दरिद्रश्च चपलः परदेशभाक् ॥६०॥

अङ्कणे तु दिनेशस्य विधौ जातो महाधनी ।
भृत्यबन्धुजनैः पूज्यो नरवाहनवान् सुखी ॥६१॥

राह्वङ्कणे निशानाथे विद्वज्जनरतः सुखी ।
मातामहधनं विद्वान् लभते ससुखं प्रभुः ॥६२॥

सितांशगे शशाङ्के तु द्विकलत्रः परप्रियः ।
परेषामुपकारी च दरिद्रो जायते नरः ॥६३॥

केत्वङ्कणगते चन्द्रे दुष्टचित्तो भवेन्नरः ।
व्रणगुल्मादिरोगैस्तु पीडितो दुःखभाजनः ॥६४॥

छायासुताङ्कणे चन्द्रे क्वचिद् दुःखी क्वचित् सुखी ।
दुर्मन्त्रनिरतो मर्त्यो जायते पिशुनो नरः ॥६५॥

कुजे तु स्वाङ्कणे भूपस्तत्तुल्यो वा न संशयः ।
ह्रस्वाङ्गः स्थूलदेही च रोगहीनो वदान्यकः ॥६६॥

कुजे वाचस्प(तांशे तु । तेरंशे) क्रौर्यवाग् दीर्घवैरकः ।
प्रभुसेवी दरिद्रश्च जायते हीनपुत्रकः ॥६७॥

बुधाङ्कणे कुजे जातो वेश्यापाठरतो नरः ।
शुभदृष्टिविहीनश्चेन्मातृहीनः परोपकृत् ॥६८॥

चन्द्रांशके कुजे भोगी मृदुगात्रः प्रतापवान् ।
वाग्मी कर्मरतः कामी जलरोगी सुपुत्रकः ॥ ६९ ॥

रवेरङ्कणगे भौमे पञ्चाशद्वर्षभाग् भवेत् ।
अतिसारेण मरणं परदेशेषु जीवनम् ॥ ७० ॥

राहोरङ्कणगे भौमे मेहरोगी नरस्सुखी ।
स्त्रीजितः कोमलाङ्गश्च विद्वानत्यन्तदुर्बलः ॥ ७१ ॥

कवेरङ्कणगे भौमे भिक्षाशी पञ्चविंशतेः ।
ततः परं सुखी भूत्वा जीवत्यब्दचतुष्टयम् ॥ ७२ ॥

केतोरङ्कणगे भौमे राजदूतो भविष्यति ।
खलो विदेशगमने शस्त्रेण म्रियते रिपोः ॥ ७३ ॥

छायासुताङ्कणे भौमे म्लेच्छेन सह जीवनम् ।
अथवा राजसेवायां म्रियते विषसेवनात् ॥ ७४ ॥

बुधे कुजाङ्कणे जातो दुष्टचित्तो नराधमः ।
विनिन्दति जनान् सर्वान् शौचाचारविवर्जितः ॥ ७५ ॥

बुधे सुरेज्यभागे स्यात् पण्डितो वेदपारगः ।
पुत्रवांस्त्रिंशदब्दात्तु पश्चाद् भिक्षुर्भविष्यति ॥ ७६ ॥

बुधे तु स्वाङ्कणे जातो ब्रह्मज्ञानी स्वकर्मकृत् ।
दरिद्रः पुत्रवान् रोगी षष्टिवर्षाणि जीवति ॥ ७७ ॥

बुधे चन्द्रांशगे जातो दरिद्रो वञ्चकः खलः ।
परदारापहारी च चौर्यकर्मरतिः सदा ॥ ७८ ॥

बुधे रव्यङ्कणे जातो न जीवति शिशुः परम् ।
यदि जीवति दीर्घायुर्लेखको जायते सदा ॥ ७९ ॥

बुधे राह्वङ्कणे जातो मध्यमायुरनर्थकृत् ।
परेषामुपकारी च पितृद्वेषी च जायते ॥८०।

बुधे काव्याङ्कणे जातः सुकलत्रः प्रतापवान् ।
दीर्घायुरतिमेधावी पुत्रहीनो भवत्यसौ ॥८१॥

बुधे केत्वङ्कणे जातो जायते (वृ? ऋ)णभाजनः ।
पञ्चचत्वारिवर्षात्तु भिक्षुर्भवति दुःखितः ॥८२॥

बुधे शन्यङ्कणे जातो राजसेवी जनप्रियः ।
वदान्यः पञ्चचत्वारि वर्षाणि सुखमेधते ॥८३॥

गुरावाद्यङ्कणे जातो वेदवेदान्तपारगः ।
तत्त्ववादेषु कुशलो लोकविख्यातिमान् शुचिः ॥८४॥

गुरौ द्वितीयगे हृष्टः कुवादकुशलो नरः ।
व्यवहारी सदा सर्वैर्धनहीनः परप्रियः ॥८५॥

गुरौ बुधाङ्कणे जातो राजराजसमो नरः ।
सर्वेषामुपकारी च षोडशाब्दानि जीवति ॥८६॥

शीतांशोरङ्कणे जीवो भोगान् पुत्रादिसम्पदम्
प्रयच्छति धनं सर्वं छत्रचामरभूषणम् ॥८७॥

रवेरङ्कणगे देवपूज्ये भोगी पितृप्रियः ।
सत्यवादी वदान्यश्च जायते बहुदारकः ॥८८॥

राहोरङ्कणगे जीवे स्त्रीणामत्यन्तमोहनः ।
पुत्रपौत्रेण सहितः पञ्चपञ्चाशदब्दकः ॥८९॥

कवेरङ्कणगे जीवे कामचारी भविष्यति ।
बहुदूरप्रवासी च द्वात्रिंशात् परतः सुखी ॥९०॥

सुरेज्ये केतुभागस्थे मन्त्रवादपरो भवेत् ।
भूमिकाधारको वापि जातो जीवति दुर्विधः ॥ ९१ ॥

सुरेज्ये शनिभागस्थे मानी कुलधनाशनः ।
परेषामुपकारेषु न करोति हिताहितम् ॥ ९२ ॥

सिते भौमाङ्कणे जातो ह्यसितस्थूलदेहभाक् ।
स्वयम्बुद्धिः पटुवचो विंशतौ नीरवाहनः ॥ ९३ ॥

भृगुजे गुरुभागस्थे जातो नष्टो भविष्यति ।
यदि जीवति दैवात् तु दशमे षोडशे मृतिः ॥ ९४ ॥

सिते बुधाङ्कणे जातो मतिमान् पङ्गुरायतिः ।
हीनाङ्गो भेषजी मन्त्री पिङ्गलाक्षो भवेन्नरः ॥ ९५ ॥

विधोरङ्कणगे शुक्रे भर(जो? तो) नट(न)प्रियः ।
वीणावादरतो नित्यं राजसेवी भविष्यति ॥ ९६ ॥

रवेरङ्कणगे शुक्रे लघुभोजी जनप्रियः ।
सङ्गीतविषवादेषु कुशलः पिशुनो भवेत् । ९७ ॥

सैंहिकेयाङ्कणे शुक्र स्त्रीलोलः कामचारवान् ।
ग्रन्थ्यण्डवातरोगाभ्यां पीडितो नेत्रदोषवित् ॥ ९८ ॥

सिते तु खाङ्कणे जातो राज्ञामत्यन्तमोहनः ।
ह्रस्वः स्थूलो महाभोगी चाटुभाषी नरोत्तमः ॥ ९९ ॥

सिते ध्वजाङ्कणे जातो वाचको याचकोऽपि वा ।
परान्नादी विदेशस्थो वणिक्सेवी भविष्यति ॥ १०० ॥

सिते पङ्ग्वङ्कणे जातो हीनपान्मन्त्रपण्डितः ।
परेषामुपकारी च शूद्रस्त्रीसङ्गमे रतः ॥ १०१ ॥

शनौ भौमाङ्कणे जातो दीर्घायुरलसः पुमान् ।
पितृद्वेषी धनाढ्यश्च जायते बहुवाक् सुखी ॥ १०२ ॥

गुरोरङ्कणगे मन्दे मन्दबुद्धिर्विशालदृक् ।
कुशलो व्यवहारेषु जायते निर्धनः पुमान् ॥ १०३ ॥

मन्दे बुधांशगे शस्त्री व्यापारे कुशली बली ।
परप्रेष्यरतो नित्यमटन्नेव स जीवति ॥ १०४ ॥

शशाङ्कभागे मन्दे तु स्नानादिसकलाः क्रियाः ।
करोत्यक्षविहारी च सुखजीवी नरो भवेत् ॥ १०५ ॥

रवेरङ्कणगे मन्दे शास्त्रदृक् परवित्तवान् ।
मृदुभाषी वदान्यश्च जायते पण्डितो नरः ॥ १०६ ॥

राह्वङ्कणगते मन्दे सुखजीवी महामतिः ।
चटुलस्सर्वकार्येषु राजमन्त्री नरोत्तमः ॥ १०७ ॥

कवेरङ्कणगे मन्दे पाण्डुः परगृहाशनः ।
द्विमातृभ्यामसौ पुष्यो द्विपित्रापि च पोषकः(?) ॥ १०८ ॥

केतोरङ्कणगे मन्दे शस्त्रसेवी रणप्रियः ।
लघुगात्रः परान्नादी पञ्चत्रिंशाब्दभाग् भवेत् ॥ १०९ ॥

स्वाङ्कणे यदि मन्दे तु बहुकन्याप्रजाकरः ।
धनवान् पितृविद्वेषी पापवाक् सुखजीवनः ॥ ११० ॥

भूमिजस्याङ्कणे राहौ बुद्धिमान् स्थूलदेहभाक् ।
राजाश्रितं(?) प्रकुरुते पितरं स्वयमेव च ॥ १११ ॥

गुरोरङ्कणगे राहौ भिक्षाशी वेदपारगः ।
परदेशप्रवासी च गङ्गास्नानरतो नरः ॥ ११२ ॥

बुधाङ्कणे फ(णौऽणी) यस्य सर्वदारिद्र्यपीडितः ।
सर्वकार्येषु चपलो न करोति शुभाशुभम् ॥ ११३ ॥

विधोरङ्कणगे राहौ पित्तवातादिरोगभाक् ।
कृशगात्रो महाभोगी कोमलाङ्गः प्रतापवान् ॥ ११४ ॥

रवेरङ्कणगे राहौ महारजतभाजनः ।
वित्तेशतुल्यो बलवान् वार्द्धक्ये तु दरिद्रवान्(?) ॥ ११५ ॥

स्वाङ्कणस्थे फणौ भोगी बन्धुपूज्यो रतिप्रियः ।
त्रिपूर्षधनवान् जातो लोकविख्यातपौरुषः ॥ ११६ ॥

कवेरङ्कणगे राहौ कवितारसभाग् भवेत् ।
अज्ञातोऽपि कविं वक्ति विदुषामपि भूषणम् ॥ ११७ ॥

केत्वङ्कणगते राहौ नवनीतप्रियो नरः ।
कोमलान्नाशनो जातः नराणामुपकारकः ॥ ११८ ॥

पङ्ग्वङ्कणगते राहौ पङ्गुरेव भविष्यति ।
अथापि लेखको भूत्वा जीवत्यब्दानि षोडश ॥ ११९ ॥

ध्वजे कुजाङ्कणं प्राप्ते जलस्तम्भादिभाग् भवेत् ।
अटन्नेव महीं सर्वां पञ्चाशद्वर्षजीवनः ॥ १२० ॥

गुर्वंशके ध्वजे प्राप्ते धनहीनः कलत्रयुक् ।
दूतकृत्यविदां श्रेष्ठो पादचारी नराधमः ॥ १२१ ॥

बुधभागं ध्वजे भृत्यः सर्वेषामपकारकृत् ।
सर्वदा शूद्रसंयुक्तश्चण्डालतनयारतः ॥ १२२ ॥

शशाङ्के तु ध्वजे प्राप्ते त्रिंशद्वर्षाणि जीवति ।
विदेशगमने हृष्टो धनमाहृत्य भुञ्जति(?) ॥ १२३ ॥

रवेरङ्कणगे केतौ पद्मपत्रायतेक्षणः ।
सप्त वर्षाणि जीवेत् तु शुभदृष्टेऽथ विंशतिः ॥ १२४ ॥

राहोरङ्कणगे केतौ छत्रचामरभाग् भवेत् ।
षट्त्रिंशदब्दजीवी च म्रियते जलरोगतः ॥ १२५ ॥

कवेरङ्कणगे केतौ वेदान्तज्ञानतत्परः ।
मन्त्रवादेषु कुशलो वैद्यशास्त्रविशारदः ॥ १२६ ॥

ध्वजे तु स्वाङ्कणे प्राप्ते महायोगी भविष्यति ।
सर्वैरपि जनैर्वन्द्योऽप्यष्टाक्षरपरो भवेत् ॥ १२७ ॥

पङ्गोरङ्कणगे केतौ दीर्घाशी नटनप्रियः ।
ग्रामप्रवर्तको भाषी जीवत्यक्षविशारदः ॥ १२८ ॥

॥ इति अङ्कणस्थग्रहाणां फलं समाप्तम् ॥

॥ अथ ग्रहयोगफलमुच्यते ॥

चन्द्रज्ञशुक्रगुरवो यद्येकत्र समाश्रिताः ।
ते सर्वे फलदातारो राजयोगप्रदा मताः ॥ १ ॥

शनिराह्वाररवयो यद्येकत्र समागताः ।
तेऽपि सम्पूर्णफलदा भूपत्वं प्रदिशन्ति च ॥ २ ॥

यत्रकुत्रापि च पुनर्द्वौ त्रयः पापिनौ शुभाः ।
ते शुभा एव फलदा पापिनौ तु निरर्थकौ ॥ ३ ॥

शनिसूर्यौ यदि युतौ विरोधित्वात् परस्परम् ।
न कुर्वाते फलं किञ्चित् स्पर्धया च समन्वितौ ॥ ४ ॥

चन्द्रज्ञौ यदि संयुक्तौ न कुर्वाते स्वकं फलम् ।
विरोधेऽपि दिशत्येव चन्द्रमाः कृपयान्वितः ॥ ५ ॥

कुजशुक्रौ यदि युतौ विरोधेऽपि फलप्रदौ ।
तयोरेकस्य दौर्बल्यं विचार्य प्रवदेन्नरः ॥ ६ ॥

गुरुशुक्रौ यदि युतौ विरोधित्वान्न संशयः ।
कुर्वाते स्वफलं सम्यग् विरोधं चापि नित्यशः ॥ ७ ॥

गुरुचन्द्रौ यदि युतौ राजराजो भविष्यति ।
आश्लेषान्ते युतावेवं मूलान्ते च भविष्यतः ॥ ८ ॥

रविचन्द्रौ यदि युतौ राजमन्त्री भविष्यति ।
रेवत्यन्ते च हस्तान्ते उत्तराषाढपूर्वयोः ॥ ९ ॥

बुधचन्द्रौ यदि युतौ कुलदीपो भविष्यति ।
श्रवणे वायुभे सार्पे आर्द्रायां प्रथमांशके ॥ १० ॥

शनिचन्द्रौ यदि युतौ गणसेवी भविष्यति ।
ज्येष्ठायां वसुभे चाग्नौ रोहिण्यां तु तथैव च(?) ॥ ११ ॥

चन्द्रारौ यदि संयुक्तौ चक्रवर्ती भविष्यति ।
पुष्येऽश्विन्यां चतुष्पादे शतायान्ते तथैव च ॥ १२ ॥

चन्द्रार्कौ यदि संयुक्तौ दीर्घायुश्च भविष्यति ।
राहुचन्द्रौ यदि युतौ महारोगी भविष्यति ॥ १३ ॥

बधिरश्चपलो भूत्वा दारिद्र्यविचारकः ।
ध्वजचन्द्रौ यदि युतौ विद्वानेव भविष्यति ॥ १४ ॥

भिक्षुर्भूत्वा महायोगी यानेन चरते सदा ।

॥ इति ग्रहयोगफलं समाप्तम् ॥

॥ अथ ग्रहयुक्तसमयफलान्युच्यन्ते ॥

सितकेतू यदि युतौ प्रलापं कुरुते रविः ।
चन्द्रस्तु कुरुते क्रीडां त्वचमुत्सृजते फणिः ॥ १ ॥

कुरुते दोहनं भौमः परं हर्षं गतो बुधः ।
गुरुस्सन्न्यासमादाय योगाभ्यासं करोति च ॥ २ ॥

शनिसर्पध्वजैर्युक्तो भौमस्तैलातिदुःखितः ।
रविरस्तंगतो भूत्वा शत्रुभिः परिपीडितः ॥ ३ ॥

गुरुशुक्रौ विवादेन व्याकुलौ नेत्रपीडया ।
विधुः स्नानाय गमने सर्पग्रहणशङ्कितः ॥ ४ ॥

शनिकेतू यदि युतौ राहुरत्यन्तदुःखितः ।
रविरक्षं सुसंकोच्य दुःखेन महता युतः ॥ ५ ॥

कवि(श्श? श्शो)केन सन्त(प्तर? प्तो)गुरुरन्तर्गतः पदा ।
कुजस्तु कुरुते मोदं बुधो बन्धुभिरश्नुते ॥ ६ ॥

गुरुकेतू यदि युतौ देवपूजारतः कविः ।
सुप्तोत्थितः शनिः सर्पः खादत्यन्नं विषादतः ॥ ७ ॥

रविराहूयते शिष्यं चन्द्रः शासति(?) मेदिनीम् ।
कुजसूर्यौ यदि युतौ बुधः पञ्चाङ्गमुच्यते ॥ ८ ॥

इन्द्रादिदैवतैः सार्धं गुरु(र्म? र्म्म)न्त्रयते कविः ।
नरवाहनमारुह्य याति प(ङ्कुग्रह? ङ्गोर्गृहं) गतः(?) ॥ ९ ॥

राहुः पीत्वा सुरां सम्यङ्मोहमास्थाय तिष्ठति ।
केतुस्तु दारानाहूय रुषा वदति पौरुषम् ॥ १० ॥

बुधसूर्यौ यदि युतौ मृष्टान्नं भुञ्जते विधुः(?) ।
विरो(जौच)न कुजः पीतः गुरुर्देशान्तरं गतः(?) ॥ ११ ॥

कविराचमनं कुर्वन् मन्थानं कुरुते शनिः(?) ।
राहुर्गुल्मेन संयुक्तः केतुरश्नाति बन्धुभिः ॥ १२ ॥

कुजराहू यदि युतौ यवनीरतिकृद् ध्वजः ।
परुषं वदते पङ्गुः कविर्निद्रां प्रकुर्वते(?) ॥ १४ ॥

गुरुरध्ययनं कुर्वन् ... शास्ति विधुस्सुखम् (?) ।
बुधस्ताम्बूलमश्नाति रविरष्टाक्षरे रतः ॥ १५ ॥

चन्द्रेण भानुर्यदि संयुतः स्या-
न्महीजभुङ्क्ते (?) शशिजः शयालुः ।
स्नातो गुरुर्दैत्यगुरुर्विलासी
गच्छञ्छनिस्तत्क्रुधि राहुकेतू(?) ॥ १६ ॥

चन्द्रो महीजेन सह स्थितश्चेद्
विद्याविलासी हिमगर्भजोऽपि ।
भुङ्क्ते गुरुर्दैत्यगुरुः स्वशिष्यान् शास्ति
प्रतापयतिशनिरक्षविहारकारी(?) ॥ १७ ॥

शास्त्रेषु वादं वितनोति राहुः
केतुस्तु यात्यक्षविहारणार्थम् ।
चन्द्रः सुरेड्येन सह स्थितश्चे-
न्मृष्टान्नभोजी कविरद्य पङ्गुः ॥ १८ ॥

तैलेन लिप्तो रविरत्र शेते
राहुस्तु शेते वदति स्म केतुः ।

गुर्वारौ यदि संयुक्तौ कविर्भूषणभूषितः ।
शिरोरोगं समास्थाय शेते पङ्गुनिकेतने ॥ १८ ॥

राहुश्चिन्तां समाधत्ते केतुरध्ययने रतः ।
रविराहूयते बन्धून् भोजनाय विधुं पिब(त्? न्) ॥ १९ ॥

बुधः पुस्तकमादाय प्रश्नं पश्यति मित्रकैः ।
कुजशुक्रौ यदि युतौ प्रयाणं कुरुते शनिः ॥ २० ॥

राहुर्मौनं समाधत्ते केतुः शोणितमश्नुते ।
रविरस्तङ्गतश्चन्द्रश्शत्रुभिः परिपीडितः ॥ २१ ॥

बुधस्तु वणिजां वृत्तिं करोति नश्वरलकैः ।
शन्यारौ यदि संयुक्तौ राहुर्वीणां शृणोति च ॥ २२ ॥

नाटयन् गणिकां केतू रविरश्नाति भेषजम् ।
व्रणादिपीडितश्चन्द्रो बुधः पश्यति निष्ठुरम् ॥ २३ ॥

गुरुर्दर्भं समादाय कविर्होमं करोति च ।
रविज्ञौ यदि संयुक्तौ चन्द्रो हर्षसमाश्रितः ॥ २४ ॥

भौमः पन्थानमास्थाय भाषते कृषिजं वचः ।
गुरुः कुशं समादाय जुहोति हविरग्निषु ॥ २५ ॥

भृगुर्दैत्यसभां याति शनिः शस्त्राणि पूजते ।
राहुकेतू विवादेन शिखामादाय तिष्ठति ॥ २६ ॥

चन्द्रज्ञौ यदि संयुक्तौ वक्ति भौमः कथां शुभाम् ।
गुरुरिन्द्रसभां गत्वा (ग्र? गृ)हाण्यटति भार्गवः ॥ २७ ॥

भस्मोद्धूलितसर्वाङ्गः शनिरौपासने रतः ।
अमृतप्राशनं राहुः केतुरुद्यानमाश्रितः ॥ २८ ॥

रविस्तु कुरुते निद्रां भूतले भार्यया सह ।
कुजज्ञौ यदि संयुक्तौ कृषिं कुर्वति(?)वाक्पतिः ॥ २९ ॥

अनुलेपनमाधत्ते शुक्रः पङ्गुः पयोऽपिबत् ।
राहुकेतू स्थितौ तूष्णीं सूर्यो मकुटधारकः ॥ ३० ॥

चन्द्रः क्षयं समास्थाय शेते दुःखेन भूतले ।
गुरुज्ञौ यदि संयुक्तौ वेदानध्यापयत्(?) कविः ॥ ३१ ॥

शनिरश्वं समारुह्य राहुणा भाषते सुखी ।
केतुरिष्टं समाधत्ते सूर्यो मध्याह्नमाश्रितः ॥ ३२ ॥

चन्द्रमाः शकटं प्राप्य खेलत्यन्तर्निकेतने ।
कुजः कुण्डलमाधत्ते वस्त्राणि सुबहूनि च ॥ ३३ ॥

शुक्रज्ञौ यदि संयुक्तौ शनिः स्नाति तमः सुखी ।
ध्वजः खादति भक्ष्याणि रविरत्यन्तदुःखितः ॥ ३४ ॥

चन्द्रमाः शास्त्रजं वाक्यं शृणोति गुरुसन्निधौ ।
कुजस्तु कुरुते दुःखं गुरुः कण्डूतिमेव च ॥ ३५ ॥

शनिज्ञौ यदि संयुक्तौ राहुरश्वानपाययत् ।
केतुस्तु कुरुते क्षौरं सूर्यः शत्रुभिराहतः ॥ ३६ ॥

चन्द्रमाः कुरुते यज्ञं किरीटं भूमिजो दधौ ।
गुरुशुक्रौ रहः कृत्वा वक्ति वार्तां सुधाकृती ॥ ३७ ॥

बुधराहू यदि युतौ केतुर्दध्यन्नमश्नुते ।
रवि(र्वि)षं समाधत्ते चन्द्रः काञ्चनविक्रयम् ॥ ३८ ॥

कुजो वाजि समास्थाय याति देशान्तरं गुरुः ।
अम्बरं भार्गवस्तैलं धरते दुःखकृच्छनिः ॥ ३९ ॥

केतुज्ञौ यदि संयुक्तौ नवनीतं रविः पिबन् ।
चन्द्रः शृङ्गारमाधत्ते भूजः पुष्पं (स)मेधते ॥ ४० ॥

गुरुस्तु कुरुते मोदं शुक्रः शोकं समाश्रितः ।
शनिराहू समालिङ्ग्य भाषते बालया सह ॥ ४१ ॥

शनिशुक्रौ यदा युक्तौ राहुः कर्माणि कुर्वते?
केतुः पचति मृष्टान्नं रविरस्तंगतः सुखम् ॥ ४२ ॥

उपवीतं शशी धत्ते भूमिपुत्रः कृषिं बुधः ।
मन्थनं रसवस्तूनां गुरुः कुञ्जरलालनाम् । ४३ ॥

राहुशुक्रौ यदा युक्तौ केतुर्युद्धाय गच्छति ।
रविर्भृत्येषु पारुष्यं चन्द्रमा व्रणपीडितः ॥ ४४ ॥

भूमिपुत्रस्तु दुर्वार्तां शृणोति कुलजां बुधः ।
वञ्चनं गु(रु)रन्नादि(?) शनिर्नीचेन भाषते ॥ ४५ ॥

केतुशुक्रौ यदा युक्तौ रविरन्तः पठन् शशी ।
माहिषं दधिरश्नाति(?) भूमिजो भूमिविक्रयम् ॥ ४६ ॥

बुधो विलिख्य गणनां वक्ति वाचस्पतिः सुखी ।
शनिश्शोकं समास्थाय राहुणा भाषते निशि ॥ ४७ ॥

बुधशुक्रौ यदि युतौ वेदान्तान् पठते गुरुः ।
शनिश्छायामुपागम्य शृणोति कुशलां कथाम् ॥ ४८॥

राहुः सुप्तोत्थितः केतुर्वेदानध्यापयन् सुतम् ।
उष्णरश्मिर्जलक्रीडां करोति सुरतं शशी ॥ ४९ ॥

रविज्ञौ यदि संयुक्तौ निवापं कुरुते शशी ।
गुरुरुग्रस्तवं वक्ति शुक्रो याति निकेतनम् ॥ ५० ॥

शनिः शृणोति शास्त्रार्थं भोजनाय निमन्त्रितः ।
राहुकेतू गृहं गत्वा योगनिद्रावशं गतौ ॥ ५१ ॥

भौमः पङ्कजमादाय याति देवनिकेतनम् ।
राहुकेतू यदि युतौ रविरालोचने रतः ॥ ५२ ॥

चन्द्रमाः कुरुते मोदं भूमिजो बहुदुःखितः ।
गुरुरम्बरमाधत्ते शुक्रः क्षीरान्नमश्नुते ॥ ५३ ॥

शनिः पत्रं समालिख्य मित्राय प्रेष्यते नरम् ।
केतुशुक्रौ युतौ पङ्गुः कुलालभवनं गतः ॥ ५४ ॥

पुराणं वदते सूर्यश्चन्द्रमा भाषते स्त्रिया ।
भौमः कुण्डलमाधत्ते बुधो मौनं समाश्रितः ॥ ५५ ॥

गुरुश्शिल्पं समाहूय भाषते भृगुरश्नुते ।
गुरुसूर्यौ यदि युतौ शलाटून् गणयन् विधुः ॥ ५६ ॥

पयःपात्रं समादाय गृहं विशति भूमिजः ।
शुक्रः शुचं समाधत्ते शनिर्विश्रमते तमः ॥ ५७ ॥

स्वादन् फलानि केतुस्तु गावो लालयते भृशम् ।
बुधः पाठयते बालांस्तुलयन् गुडसञ्चयम् ॥ ५८ ॥

गुरुचन्द्रौ यदि युतौ भौमो हर्षेण संयुतः ।
गृहान्तरं गतो भूत्वा बुध उष्णजलं पिबन् ॥ ५९ ॥

हरीतक्याश्रयं पीत्वा कविर्बाह्यं गतः शनिः ।
वयस्यैर्याति वीथीषु राहुः शौचं न कार्यकृत् ॥ ६० ॥

केतुस्तु कुरुते मोदं शिष्यं पुत्रांश्च लालयन्
गुरुभौमौ यदि युतौ बुधो वातेन पीडितः ॥ ६१ ॥

भृगुर्दापयते रत्नान्(?) शनिर्योगं समादधे ।
करोति मङ्गलं राहुः केतुरुग्रं समाश्रितः ॥ ६२ ॥

गुरुज्ञौ यदि संयुक्तौ कविर्ग्रामान्तरं गतः ।
पङ्गुरध्ययनं कुर्वंस्तमः पाठयते सुतम् ॥ ६३ ॥

केतुः सेचयते भार्यां रविः पुण्ड्रं समादधे ।
विधुर्बुधस्तु सुरतं प्रियां स्वामीक्षते कुजः ॥ ६४ ॥

गुरुपङ्गू यदि युतौ कविर्दानाय दीक्षितः ।
शिखाबन्धं च कुरुते राहुरप्सु क्रियां शिखी ॥ ६५ ॥

असिमादाय सूर्यस्तु वेष्टते शत्रुणा सह ।
शशी भूमिं समागत्य नदीस्नानाय वर्तते ॥ ६६ ॥

कुजो नालं समादाय लालयन् भाषते प्रियाम् ।
बुधस्तु गणयन् सङ्ख्यां सभां गच्छति शीघ्रतः ॥ ६७ ॥

गुरुकेतुयुतौ सूर्यो गवां दोहनतत्परः ।
विधुः श्राद्धं वितनुते कुजस्तु सहते बुधः ॥ ६८ ॥

पूजां गुरुः पुराणानामर्थं दास्यति देहिनाम् ।
भृगुरश्नाति पङ्गुस्तु भाषते बन्धुभिः सह ॥ ६९ ॥

गुरुयुक्ते सिते भौमः पिबत्यम्बु बुधोऽलिखत् ।
वारराशीयुतश्चन्द्रः शनिरालोचने रतः ॥ ७० ॥

राहुकेत्वपि कुर्वाते चाटूनि रविरक्षकृत् ।
राह्वारौ यदि संयुक्तौ कविरश्नाति बन्धुभिः ॥ ७१ ॥

तर्क्यते गुरुणा पङ्गुः शास्ति चन्द्रोऽथ मेदिनीम् ।
रविः स्थलं समादाय याति वेश्यानिकेतनम् ॥ ७२ ॥

चन्द्रयुक्ते सिते भौमः कुञ्जरारोहणे रतः ।
सौम्यो यदि विलासी च पदा सञ्चरते गुरुः ॥ ७३ ॥

ताम्बूलं कुरुते काव्यः पङ्गुरत्यन्तदुःखितः ।
बुधशुक्रयुते पङ्गुस्तैललिप्तो ध्वजोऽलिखत् ॥ ७४ ॥

राहुश्च शासनं कुर्वन्नवदत् परुषं वचः ।
चन्दनेनानुलिप्ताङ्गः शशी रोषयुतो रविः ॥ ७५ ॥

गुरुणा सहिते सूर्ये मन्दः कण्डूयने रतः ।
आरो वाजि समारुह्य वनं विशति बालकैः ॥ ७६ ॥

प्रशास्ति भृत्यान् राहुस्तु योगाभ्यासरतो बुधः ।
विधुर्व्याकरणं कुर्वन् प्रसङ्गं कुरुते सदा ॥ ७७ ॥

इति ग्रहयोगसमयः ।

अथ आयुर्भावनिर्णयः ।

लग्नेशे नीचभागस्थे वाचस्पत्यङ्कणे यदि ।
आयुःस्थानाधिपे मन्दे षोडशे विंशतौ मृतिः ॥ १ ॥

आयुःस्थानाधिपे केन्द्रे केत्वङ्कणगतेऽपि वा ।
लग्नेशे निद्रिते वापि पञ्चविंशतिवर्षभाक् ॥ २ ॥

सुखस्थाने फणी मन्दे लग्नेशे तैललेपने ।
शुभग्रहविहीनश्चेत् पञ्चमे पञ्चविंशतौ । ३ ॥

लग्नाष्टमव्ययेशानां दुःखनिद्रादि जायते ।
तथा जातो त्रिवर्षेण त्रिंशद्वर्षेण वा मृतिः ॥ ४ ॥

अष्टमाधिपतौ पापे वाचस्पत्यङ्कणे यदि ।
तथा ज्वरातिसाराभ्यां म्रियते पञ्चविंशतौ ॥ ५ ॥

रन्ध्रे कुजे फणांशे तु त्रिंशद्वर्षाणि जीवति ।
रन्ध्रे फणौ व्यये चन्द्रे राह्वङ्कणगतौ यदि ॥ ६ ॥

त्रीणि चत्वारि पञ्चाशद्वत्सरे मरणं भवेत् ।
व्यये मन्ते सुते पापे भौमाङ्कणसमाश्रिते ॥ ७ ॥

पञ्च चत्वारि वर्षाणि विषेण मरणं भवेत् ।
लग्ने कुजे फणौ रन्ध्रे चन्द्रेण सहितो यदि ॥ ८ ॥

तदा जातस्त्रिवर्षेण स्वाङ्कणेऽशीति जीवति ।
रन्ध्रे शनौ निद्रिते चेल्लग्नेशे मन्तमाश्रिते ॥ ९ ॥

तदा चत्वारि वर्षाणि पञ्चचत्वारि वा मृतिः ।
पञ्चमे रविशुक्रौ चेद् रवेरङ्कणगौ यदि ॥ १० ॥

षोडशे विंशतौ चाब्दे नरवाहनवान् भवेत् ।
पञ्चपञ्चाशदब्दे तु रक्तस्रावेण वा मृतिः । ११ ॥

इत्यायुर्भावनिर्णयः ।

अथ बालारिष्टम् ।

शन्यारौ यदि संयुक्तौ वाचस्पत्यङ्कणे यदि ।
व्रणाङ्कितततनुर्जातः कृष्णदोषयुतो भवेत् ॥ १ ॥

गुर्वङ्कणगतो राहुश्चन्द्रेण यदि संयुतः ।
जलरोगयुतो भूत्वा मण्डूकरुगभूच्छिशुः ॥ २ ॥

वाचस्पत्यङ्कणे शुक्रे केतुजातः शिशुः परम् ।
दोषो नारायणस्याभूदथवा ऋतुदोषभाक् ॥ ३ ॥

शश्यङ्कणगतौ सौम्यकुजौ यदि समाश्रितौ ।
वातरोगेण संयुक्तौ विषूच्या मरणं भवेत् ॥ ४ ॥

विधुजस्याङ्कणे शुक्रे ताम्बूलं चरते यदि ।
सौमङ्गल्येन महता शिशुमात्रो विनाशितः ॥ ५ ॥

शुक्रारौ पञ्चमे केतोरङ्कणे संस्थितौ यदि ।
अतिसारेण सततं बाध्यते पञ्चवर्षभाक् ॥ ६ ॥

केत्वारौ षष्ठगौ मन्दः स्वाङ्कणे संस्थितौ यदि ।
त्रीणि वर्षाणि विज्ञेयः शिशुर्मान्देन नश्यति ॥ ७ ॥

अष्टमे राहुभागे तु जीवशुक्रौ यदा युतौ ।
दोषेण महता जातः पञ्चविंशतिमासभाक् ॥ ८ ॥

तनौ राह्वङ्कणे मन्दभूमिजौ यदि संयुतौ ।
ज्वरातीसारमरणं सर्वदा व्रणपीडनम् ॥ ९ ॥

लग्ने राह्वारमन्दाश्चेत् दिनेशस्याङ्कणे यदि ।
गणदोषेण मरणं षड्वर्षे सप्तमेऽपि वा ॥ १० ॥

शन्यङ्कणे रवौ लग्ने पञ्चमे कुजभूमिजौ ।
पिशाचेन महारोगं दशवर्षायुषो भवेत् ॥ ११ ॥

व्यये राह्वङ्कणे जीवे पञ्चमे पापसंयुते ।
ज्वररोगेण मरणं पञ्चमे द्वादशेऽपि वा ॥ १२ ॥

वाक्पतावष्टमे शुक्रस्याङ्कणे संस्थितो यदि ।
चिरेण भाषते जातो गद्गदेन समन्वितः ॥ १३ ॥

वाचस्पत्यङ्कणे राहुकुजौ यदि समाश्रितौ ।
क्रूरवाग्गद्गदो भूत्वा भाषते क्रूरचेष्टकः ॥ १४ ॥

शुभा बुधाङ्कणं प्राप्ताः पापाः पञ्चमरन्ध्रगाः ।
मूकत्वं लभते जन्तू रहः कृच्छ्रेण भाषते ॥ १५ ॥

भौमजीवौ द्वादशगौ राह्वङ्कणगतौ यदि ।
कृष्णदोषयुतो जातः सप्तमेऽब्दे मरिष्यति ॥ १६ ॥

नवमे शशिमन्दारा बुधाङ्कणसमाश्रिताः ।
नेत्ररुग्भयरोगी च म्रियते द्वितीयके ॥ १८ ॥

कुटुम्बस्थानगे राहौ तदीशे बलवर्जिते ।
पापग्रहेण संयुक्ते कुलदोषात् सुतक्षयः ॥ १९ ॥

पुत्रस्थानगते चन्द्रे तदीशे बलवर्जिते ।
कारके बलहीने तु देवशापात् सुतक्षयः ॥ २० ॥

पुत्रस्थानाधिपे केन्द्रे कारके बलवर्जिते ।
चिरेण लभते पुत्रं प्रायश्चित्तैश्च पुत्रकान् ॥ २१ ॥

पञ्चमे पापसंयुक्ते तदीशे पापसंयुते ।
शुभदृष्टिविहीने तु पिशाचेन सुतक्षयः ॥ २२ ॥

लग्नेशे पञ्चमं याते तदीशे बलवर्जिते ।
कारके बलयुक्तेऽपि शान्तिं कृत्वा सुतं लभेत् ॥ २३ ॥

लग्नात् त्रिकोणगे पापे राहुभौमनिरीक्षिते ।
पुत्रस्थाने शनियुते पिशाचेन सुतक्षयः ॥ २४ ॥

कुटुम्बनाथे कुजसंयुते वा संवीक्षिते वा यदि पुत्रसिद्धिम् ।
वदन्ति सर्वे मुनयस्तु तज्ज्ञाः शान्त्या हि सर्वं यदि दोषजालम्(?) ॥२५॥

सुतेशे बलहीने तु स्वाङ्कणे संस्थिते यदि ।
चन्द्रेण सहिते विद्याच्छापा लम्बोदरस्य तु ॥ २६ ॥

मन्दे कुजे गुरौ षष्ठे सुतेशे बलवर्जिते ।
स्कन्ददोष इति प्राहुस्तस्मात् पुत्रक्षयं विदुः । २७ ॥

सुतेशे पापसंयुक्ते कारके बलवर्जिते ।
राह्वङ्कणे विलग्नेशे सर्पशापात् सुतक्षयः ॥ २८ ॥

शुक्रे षष्ठे सुते सौम्ये मन्दभौमनिरीक्षिते ।
पुत्रस्थानाधिपे तुङ्गे गौरीदोषात् सुतक्षयः ॥ २९ ॥

पुत्रस्थाने शनौ सर्पे तदंशे भानुसंयुते ।
मान्दिमन्दयुते दृष्टे पिशाचेन सुतक्षयः ॥ ३० ॥

अन्त्ये गुरौ स्वाङ्कणस्थे पञ्चमे पापसंयुते ।
लग्नेशे निद्रिते वापि रुद्रदोषात् सुतक्षयः ॥ ३१ ॥

गुरौ विषादयुक्तेऽपि पञ्चमे पापसंयुते ।
सुतेशे बलयुक्तेऽपि पितृदोषात् सुतक्षयः ॥ ३२ ॥

मदे शुक्रे गुरौ षष्ठे भौमे पञ्चमसंयुते ।
राह्वङ्कणे विलग्नेशे लक्ष्मीशापात् सुतक्षयः ॥ ३३ ॥

मदे शनौ कुजे पुत्रे गुरावन्त्ये धने विधौ ।
केत्वङ्कणस्थिता ह्येते देवशापात् सुतक्षयः ॥ ३४ ॥

निद्रायुक्ते सुतेशे तु केत्वङ्कणगते गुरौ ।
इन्दुना सह युक्तेऽपि पुत्रहानिकरो भवेत् ॥ ३५ ॥

मदे बुधे स्वाङ्कणस्थे सुतेशेन युतेऽपि वा ।
कारके राहुभागे तु शान्तिं कृत्वा सुतं लभेत् ॥ ३६ ॥

सुतेशे व्ययराशिस्थे केत्वङ्कणगते यदि ।
तस्य पुत्रस्तु दत्तः स्यात् स तु शान्त्या हि जीवति ॥ ३७ ॥

लग्नपञ्चमभाग्येशा निद्राखेदरतिं गताः ।
तस्य पुत्रस्तु दत्तः स्याद् गुरुशान्त्या स जीवति ॥ ३८ ॥

सुखेशे भृगुरंशे तु सुतेशे गुरुरङ्कणे ।(?)
कारके भूमिजस्यांशे दत्तोऽपि मरणं ययौ ॥ ३९ ॥

सुतस्थानाधिपे मन्दे रवेरङ्कणगे यदि ।
गुरौ ध्वजाङ्कणे यस्य तस्य पुत्रो न म्रियते ॥ ४० ॥

॥ अथ दत्तपुत्रभावः ॥

अङ्कणे देवपूज्यस्य राहुर्लग्ने स्थितो यदि ।
तदा जातस्तु तद्योगे दत्तः पञ्चमगस्य तु ॥ १ ॥

लग्ने गुर्वङ्कणे केतुः सप्तमे चन्द्रसर्पयोः ।
तदा स्वस्थस्तु चन्द्रश्चेद्धीनदत्तो भविष्यति ॥ २ ॥

शनौ नीचे विलग्नेशे भृग्वङ्कणगते यदि ।
तदा पुत्रोऽभिमानी स्यात् स्वसृसौख्यविहीनकः ॥ ३ ॥

मंदे गुरौ स्वाङ्कणस्थे धनेशे तु समन्विते ।
गुळिके तु व्यये जातः पञ्चमे हीनदृष्टिभाक् ॥ ४ ॥

लग्नेशे कविरंशे तु तैललिप्ते मदाधिपे ।
तदा जातस्तु दत्तः स्यात् परदेशधनात् सुखी ॥ ५ ॥

सुतस्थानाधिपे पापे राहुकेत्वङ्कणे स्थितः ।
अपुत्रस्तु तदा जातो ह्यभिमानसुतोऽपि वा ॥ ६ ॥

चतुर्णां खेचराणां वा निद्रायोगबलैर्जुषाम् ।
अपि जातः स दत्तः स्यात् पुनर्दत्तो भविष्यति ॥ ७ ॥

गुरुशुक्रज्ञचन्द्राणां खेदे जातस्य सन्ततिम् ।
न दिशन्ति ग्रहा भ्रातृन् धनाढ्य सुतशोभिनम् (?) ॥ ८ ॥

मदे शुक्रे ध्वजे राहोरङ्कणे यदि जायते ।
तस्य पुत्रक्षयं प्राहुः पितृदोषात् कुलोद्भवात् ॥ ९ ॥

पञ्चमे यदि शुक्रज्ञौ बुधाङ्कणसमाश्रितौ ।
विष्णुशापेन महता सुतक्षयमथोच्यते ॥ १० ॥

लग्नेशे यदि पङ्गुश्चेत् पञ्चमे सितभूमिजौ ।
गौरीदोषेण महता जायते च सुतक्षयः ॥ ११ ॥

लग्नेशो देवपूज्यश्चेत् सप्तमाङ्कणसंस्थितः ।
पञ्चमे रविमन्दौ चेद् देवशापात् सुतक्षयः ॥ १२ ॥

पञ्चमे पापमध्यस्थे तदीशे तु ध्वजाङ्कणे ।
कारके निद्रिते वापि गणदोषात् सुतक्षयः ॥ १३ ॥

सुतरन्ध्रव्ययेशानां राहुध्वजबुधाङ्कणे ।
गौरीदोष इति प्राहुस्तस्याः शापात् सुतक्षयः ॥ १४ ॥

कर्मपञ्चमलग्नेशाः शनिसूर्यकुजाङ्कणाः ।
लक्ष्मीदोष इति प्राहुस्तस्याः पुत्रक्षयं विदुः ॥ १५ ॥

सुतस्य केन्द्राधिपतयो राह्वङ्कणगता यदि ।
तदापि सर्पदोषेण जायते न च पुत्रकः ॥ १६ ॥

सुतत्रिकोणनेतारौ गुरुचन्द्राङ्कणौ यदि ।
तस्य षण्मुखदोषेण जायते न च बालकः ॥ १७॥

पञ्चमे पापसंयुक्ते तदीशे भूमिजाङ्कणे ।
कारके खेदसंयुक्ते रुद्रशापात् सुतक्षयः ॥ १८॥

॥ अथ शान्तिकल्पः ॥

रुद्रशान्तिः—

प्रदोषव्रतमारभ्य वत्सरान्ते समापयेत् ।
रुद्रदोषस्य तच्छान्तिः पश्चात् पुत्रो भविष्यति ॥ १ ॥

अथ स्कन्दशान्तिः—

षष्ठीव्रतं समारभ्य क्षीरेण हविषा पुनः ।
वत्सरान्ते वटून् पूज्य सुतं लभ्याज्जनस्सुखम् (?) ॥ २ ॥

अथ देवशापशान्तिः—

रविवारोदये स्नात्वा ब्राह्मणेन विपश्चिता ।
सहस्रकृत्वो द्रविणं जप्त्वा प्राश्य सुतं लभेत् ॥ ३॥

अथ लम्बोदरशापपरिहारः—

सर्वारिष्टं पुरस्तीर्त्वा पश्चादुग्रं प्रतापयेत् ।
तेन दोषा विनश्यन्ति सुतं प्राप्य सुखी भवेत् ॥ ४॥

अथ पितृशापस्य परिहारः—

संस्थाप्य कलशान् पञ्च पूर्षभूसुक्तपञ्चकम् ।
धान्यादिभिरलङ्कृत्य प्रतिमां विनिवेद्य च ॥ ५ ॥

पूर्वरात्रौ समारभ्य प्रातःकाले समापयेत् ।
दशदानादिकं सर्वं दत्त्वा पश्चात् सुतं लभेत् ॥ ६ ॥

अथ गौरीशापपरिहारः—

पुत्रार्थी गुरुवारस्य प्रातःकाले तु पार्वतीम् ।
रजतप्रतिमां कृत्वा शास्त्रवित् प्रोक्षणं चरेत् ॥ ७ ॥

तस्मिन् दिने तु सायाह्ने दम्पतीवरणं चरेत् ।
शुक्रवारोषसि स्नात्वा सम्पूज्य च तु दम्पती ॥ ८ ॥

दशदानादिकं कृत्वा ब्राह्मणान् भोजयेत् पुनः ।
पादतीर्थं गृहीतं चेत् सुपुत्रश्च भविष्यति ॥ ९ ॥

अथ लक्ष्मीदोषपरिहारः—

उपोष्य शुक्रवारे तु शनिवारे शुभर्क्षगे ।
नारायणं समुद्दिश्य ब्राह्मणान् भोजयेत् ततः ॥ १० ॥

नवनीतं रवेर्वारे अभिमन्त्र्य द्विजैः सह ।
दापयित्वा सुदारेषु दशदानादिकं चरेत् ॥

दीर्घायुषं सुतं लब्ध्वा भविष्यति सुखं नृणाम् ॥ ११ ॥

अथ पिशाचदोषस्य परिहारः—

तेषां तत्पूजकस्तृप्तिं कृत्वा रक्षां समाचरेत् ।
सर्वारिष्टं ततः पश्चात् कृत्वा पुत्रं लभेन्नरः ॥ १२ ॥

अथ शास्तृदोषस्य परिहारः—

सर्वारिष्टं ततः कृत्वा ब्राह्मणान् भोजयेत् सुधीः ।
पुत्रवत्प्रतिमां कृत्वा स्वस्तिवाचनपूर्वकम् ॥
तदालयं निवेश्याथ पुत्रार्थी लभते सुतम् ॥ १३ ॥

अथ विष्णुदोषस्य परिहारः—

उपोष्य श्रवणं व्यग्रो धनिष्ठायां यथाबलम् ।
तिलमादाय पश्चात्तु विलिख्य प्रतिमां हरेः ॥ १४ ॥

तस्मादुपरि निक्षिप्य मन्त्रवद्दापयेत् पुनः ।
गृहदानादिकं कृत्वा ब्राह्मणान् भोजयेत् पुमान् ॥

ब्रह्मनिष्ठं सुतं लब्ध्वा सुखी भवति निश्चयम् ॥ १५ ॥

अथ ग्रहदोषस्य परिहारः— रवेः,

रविवारे ग्रहादीनां चक्रं संस्थाप्य पूजयेत् ।
हैयङ्गवं समादाय पुंसूक्तेनाभिमन्त्र्य च ॥ १६ ॥

दत्त्वा पत्न्यै पुनर्विप्रान् भोजयेच्छक्तिमात्रतः ॥
ततः परं गोधिकाया दानं पश्चाद्दशादिकम् ॥ १७ ॥

चन्द्रदोषपरिहारः—

सोमवारोषसि स्नात्वा शिवपूजां समाचरेत् ।
दश दानं ततः कृत्वा तल्लिङ्गं ब्राह्मणाय च ॥

बन्धुभिर्ब्राह्मणैः सार्धं भुक्त्वा स्वस्ति समाचरेत् ॥ १८ ॥

कुजदोषपरिहारः—

चतुःपञ्चनवत्रीणि स्त्रिय आहूय शक्तितः ।
अभ्यङ्गाद्युपचारेण सम्पूज्य पतिभिः सह ॥ १९ ॥

वस्त्रगन्धादिकं कृत्वा भोजयित्वा यथाक्रमम् ।
लक्ष्मीमम्बां शचीं दुर्गां तेषु चावाहितां पुनः ॥

उद्याप्य दशदानादीन् कृत्वा पुत्रं लभेन्नरः ॥ २० ॥

बुधदोषपरिहारः—

वैष्णवीं प्रतिमां कृत्वा प्रोक्षणादि समाचरेत् ।
बुधवारोषसि स्नात्वा पञ्चगव्याच्छुचिर्भवेत् ॥ २१ ॥

दरिद्राय च शान्ताय प्रतिमां दापयेन्नरः ।
दश गृहादिदानानां कृत्वा पुत्रो भविष्यति ॥ २२ ॥

अथ गुरुदोषपरिहारः—

प्रातरुत्थाय पुत्रार्थी तुलसीग्रहणं चरेत् ।
निवेद्य विष्णवे मासान् पश्चात् त्रीन् गुरुवारके ॥

तच्छान्तिमेव तद्वारे कृत्वा पुत्रो भविष्यति ॥ २३ ॥

अथ शुक्रदोषपरिहारः—

वर्षमेकं प्रदोषे च रुद्रपूजां समाचरेत् ।
कृत्वा समापनं पूर्वं गृहदानादिकं चरेत् ॥ २४ ॥

अथ शनिदोषपरिहारः —

मन्दवारे व्रतं कृत्वा समाप्य तिलतैलकान् ।
ब्राह्मणाय सुशीलाय प्रतिमां तस्य दापयेत् ॥ २५ ॥

अथ राहुकेतुदोषपरिहारः—

सेतौ स्नात्वा यथाशक्ति पुत्रार्थमिति दापयेत् ।
पश्चान्नागप्रतिष्ठां तु ह्याचरेत् पुत्रवान् भवेत् ॥ २६ ॥

अथ सात्त्विकादिवेलाविशेषेण नवांशालग्नवशाद् ग्रहयोगा उच्यन्ते—

यत्र त्रयो वा चत्वारः शुभा वा यदि वाशुभाः ।
ग्रहास्तिष्ठन्ति तन्मध्ये स्वभावेन तु यः स्थितः ।
स एव बलवान् प्रोक्तः शेषाः सर्वे च दुर्बलाः ॥ १ ॥

कुटुम्बनाथे कुजसंयुते वा संवीक्षिते वा यदि पुत्रहानिः
वदन्ति सन्तः खलु पुत्रभावे पापेन युक्ते सुरपूज्यशान्तिम् ॥ २ ॥

अथ दिङ्निर्णयः—

स्वस्थाने तु दिनेशः स्याच्चन्द्रमा वारुणीं दिशम् ।
कुजाग्नेयं बुधो याम्यं नैर्ऋत्यां तु गुरुस्तथा ॥ ३ ॥

कवेस्तु वायवीयं तु शनेरीशान्यमेव च ।
राहोः कुबेरककुभं केतोरूर्ध्वमिति स्मृतम् ॥ ४ ॥

अथ गुलिकफलम् — गुलिकभवननाथ इत्यादि ।

ग्रहाश्च सर्वे गुलिकेन युक्ता
दुष्टा भवेयुर्न फलप्रदाः स्युः ।
अथापि पापाः प्रदिशन्ति कार्यं
शुभं न कुर्युर्मरणप्रदाश्च ॥ १ ॥

जन्मप्रयाणे यदि खेदखेटाः
सम्पूर्णबिन्दुश्च सुहृद्ग्रहस्थः ।
शुभेक्षितश्चापि फलं नराणां
न दास्यते सुप्तवदल्पतां च ॥ २ ॥

यात्रा ग्रहाणां यदि पापिनां चेद्
जातस्य सौख्यं प्रदिशन्ति खेटाः ।
न स्युः शुभानां मरणाय निश्चिताः
शुभेक्षिताश्चेदपि रोगदाः स्युः ॥ ३ ॥

निद्रालुता कालविशेषयोगं
विनाशन कुर्वति(?) नेत्रयोर्भृशम् ।
बुभुक्षुता खे चरतां ग्रहाणां
वेदार्थदर्शी न विशेषयुक्तः ॥ ४ ॥

सम्भाषणं बन्धुभिरद्य सम्पदं
पुत्रादिकं चापि शुभग्रहाणाम् ।
स्वदेशनाशं यदि पापिनां वा
स्वाङ्गस्य नाशं सुतदारकाणाम् ॥
अध्यापकत्वं कुरुते नृणां वा
कुशार्जनं कोमलतां च पुण्ड्रम् ॥ ५ ॥

दानारम्भः शुभं नृणां दास्यते दानशीलताम् ।
अङ्गानां मर्दनं सौख्यं शिखाग्रन्थि शुभ नृणाम् ॥ ६ ॥

सुप्तोत्थितः प्रकुरुते पितरं धनाढ्यं
स्नातोऽपि सौख्यं गमनं वियोगम् ।
पूजान्वितः पुण्यतनुं विहारी
विहारिणं भोजनकृत् सुभोजनम् ॥ ७ ॥

तैलानुलेपं कुरुतेऽपि दुःखं
वस्त्रं मनोज्ञं सुखमङ्गरागम् ।
अक्षं रुजं हीनपदं च कोपं
विलेखनं लेखकमण्डरोगिणम् ॥ ८ ॥

यात्रा मृगाणामभिमोहनाङ्ग
   क्षीरं शुभं शोकमतीव दुःखम् ।
विनिष्फलं विश्रमण ग्रहाणां
   मिश्रं फल खादनमुष्णशम्बरम् ।। ९ ।।

पुष्पं मुदं लालनमद्य योगं
   शिल्पं ग्रहाणामसुखप्रदं च ।
चर्चादरिद्रं शयनं च दुर्बलं
   विलेपनं रोगदमर्थनाशकम् ।। १० ।।

कण्डूयनं कामदमन्नपानं
   सर्वार्थदं स्वप्नमतीव दुःखम् ।
राज्याधिपत्यं जनमोहनं च
   गोदोहनं वित्तचयप्रदं च ।।

आरामसेवां कुरुते सुखाढ्यं
   यानं प्रभुत्वं वितनोति नृणाम् ।। ११ ।।

तिर्यग्दृष्टिस्तु कुरुते सम्पदं शास्त्रदृक् सुखम् ।
क्रूरदृङ्नाशदाः प्रोक्ता समदृष्टिः सुखावहा ।। १२ ।।

पुराणं पुण्यकृद्देवपूजनं सुखद विदुः ।
यानं क्षत्रियवृद्धिश्च मृगयात्रादिषु प्रिया ।। १३ ।।

तैललेपनमत्युष्णं चन्दनं मध्यमं स्मृतम् ।
उपवीतं शिखाबन्धमारोग्यं फलदं नृणाम् ।। १४ ।।

— —

अथ लग्ननिर्णयः ।

मेषलग्ने रवौ स्वस्थे सात्त्विके धनुरंशकः ।
मेषलग्ने निशानाथे स्वाङ्कणे संस्थिते यदि ॥ १ ॥

तौलीलग्नांशसम्भूतमथवा मिथुनांशकः ।
मेषे कुजे दिनेशे तु स्वाङ्कणे जायते नरः ॥ २ ॥

सिंहलग्नांशकः कालः स्त्रियस्तामसि मेषगः ।
मेषे केत्वङ्कणे जातो राजसे कटकांशकः ॥ ३ ॥

अथवा मिथुनांशः स्यात् वृश्चिकांशकमेव च ।
मेषे गुरौ तामसिजः कन्यांशः कटकांशगः ॥ ४ ॥

वृषांश इति वा ब्रूयाद् राह्वङ्कणगतो यदि ।
स्त्रीकाले मेषराशौ चेच्छुक्रे स्वाङ्कणगे यदि ॥ ५ ॥

तदा वृषांशकं ज्ञेयं गुरोरङ्केऽथवा पुनः ।
मेषे शनौ स्वाङ्कणस्थे तामसे यदि जायते ॥ ६ ॥

तस्य मेषांशकं ज्ञेयं बुधांशौ वा न संशयः ।
मेषे फणौ सात्त्विके तु रव्यङ्कणगते यदि ॥ ७ ॥

सिंहांशक इति ज्ञेयमथवा वृश्चिकांशगः ।
अजे ध्वजे रजःकाले धनुरंशः शिशुर्ध्रुवम् ॥ ८ ॥

अथवा वृषभांशः स्यान्नान्यथा जायते शिशुः ।
वृषे रवौ रजःकाले स्वाङ्कणे मकरांशगः ॥ ९ ॥

चन्द्राङ्कणे यदा जातो बुधांश इति वा वदेत् ।
सात्त्विके तु वृषे काले निशानाथे बुधाङ्कणे ॥ १० ॥

जायते तु स्त्रियःकाले कुम्भांशे मकरांशगः ।
वृषे तु सात्त्विके काले कुजे जातो गुर्वंशकः (?) ॥ ११ ॥

अथवा कटकांशः स्याच्चन्द्राङ्कणगतो यदि ।
बुधे वृषे स्वाङ्कणस्थे सात्त्विके रविरंशगः ॥ १२ ॥

तामसे वृषाभांशः स्याद् रजःकन्यांशसभवः ।
वृषे गुरौ रजःकाले सिंहांशौ जायते नरः ॥ १३ ॥

अथवा शनिरंशः स्यात् शुक्रः सूर्याङ्कणे यदि ।
वृषे शुक्रे सात्त्विके तु वृषांशः फणिरङ्कणः । १४ ।

स्वाङ्कणे यदि जातः स्यात् कटकः कुम्भ एव वा ।
वृषे शनौ कुजांशस्थे तामसे मिथुनांशगः ॥ १५ ॥

सात्त्विके वृषसिंहौ च जायते तु नरः पुमान् ।
फणौ वृषे रजःकाले रव्यङ्कणगतो यदि ॥ १६ ॥

तदा जातस्तु कन्यांशो मकरांशोऽथवा पुनः ।
वृष ध्वजे तमःकाले कुजाङ्कणगते यदि ॥ १७ ॥

तदा मेषांशको ज्ञेयः कटकांशस्तदङ्कणे ।
युग्मे रवौ सितांशस्थे तामसे मकरांशकः ॥ १८ ॥

सात्त्विके तु तुलांशः स्यात् राजसे वृषभांशगः ।
यमे चन्द्रे रजःकाले स्वाङ्कणे संस्थिते यदि ॥ १९ ॥

धनुरंशः स विज्ञेयः सात्त्विके मकरांशगः ।
युग्मे कुजे स्वाङ्कणस्थे तामसे वृषभांशकः ॥ २० ॥

अन्ययोस्तु यथाजातः शुभांशो यमगांशगः ।
युग्मे बुधे तमःकाले शन्यङ्कणगते यदि ॥ २१ ॥

शन्यंशगः शिशुर्ज्ञेयो ह्यथवा धनुरंशगः ।
युग्मे गुरौ कुजः काले वाचस्पत्यङ्कणे यदि ॥ २२ ॥

तदा तु जातः कुम्भांशोऽप्यथवा मिथुनांशगः ।
फणौ युग्मे तमःकाले स्वाङ्कणे मकरांशगः ॥ २३ ॥

अन्याङ्कणे यदा जातो मेषांश इति निश्चितः ।
ध्वजे युग्मे सात्त्विके तु पङ्ग्वङ्कणगते यदि ॥ २४ ।

तदा मीनांशके जातः कुम्भांशकमथापि वा ।
एवं चरस्थिरादीनां निश्चयेदंशकान् सुधीः ॥ २५ ॥

अथान्त्यकालनिर्णयः—

रविचन्द्रौ मेषगौ चेत् स्वाङ्कणे संस्थितौ यदि ।
तदा जातस्तु षष्ट्यब्दे धनुर्मासि सिते शुभे ॥ २६ ।

विषूच्या मरणं वाच्यमथवा ज्वररोगतः ।
रविज्ञौ मेषसंस्थौ चेद् बुधाङ्कणसमन्वितौ ॥ २७ ।

पञ्चवर्षेण मरणं शुभयोगेऽथ विंशतौ ।
रव्यारौ मेषलग्नौ चेत् स्वाङ्कणस्थौ शुभान्वितौ ॥ २८ ॥

पञ्चसप्ततिवर्षेण म्रियते रक्तरोगतः ।
रविसौम्यौ मेषगौ चेद् राह्वङ्कणगतौ यदि ॥ २९ ॥

जातस्तु पञ्चवर्षेण पञ्चचत्वारि वा मृतिः ।
रविशुक्रौ मेषसंस्थौ स्वाङ्कणे पञ्चविंशतौ ॥ ३० ॥

तदा पञ्चाशदब्दे तु सन्निपातज्वरान्मृतिः ।
रविमन्दौ मेषसंस्थौ गुर्वङ्कणगतौ यदि ॥ ३१ ॥

द्वात्रिंशदब्दजीवी च पश्चाच्छस्त्रेण वा मृतिः ।
रविराहू यदा मेषे बुधाङ्कणगतौ यदि ॥ ३२ ॥

तदा जातस्तु विज्ञेयः पञ्चविंशतिवार्षिकः ।
मेषे ध्वजरवी युक्तौ स्वाङ्कणस्थौ सितान्वितौ ॥ ३३ ॥

तदा जातो माघमासे कृष्णपक्षे म्रियेत सः ।
वृषे चन्द्रे गुरौ लग्ने शनौ रव्यङ्कणे स्थिते ॥ ३४ ॥

द्वात्रिंशदब्दजीवी च फाल्गुने म्रियते शिशुः ।
वृषे कुजे बुधांशे तु दश वर्षाणि रोगवान् ॥ ३५ ॥

ततः परं सुखी भूत्वा स्थितो लग्नेशवन्नरः ।
वृषे बुधे धनी मानी भृग्वङ्कणगते यदि ॥ ३६ ॥

तदा जातः पितृद्वेषी चत्वारिंशे मृतो भवेत् ।
वृषे गुरौ स्वाङ्कणस्थे पुत्रपौत्रादिभाग्यवान् ॥ ३७ ॥

चन्द्रेण संयुते दृष्टे अशीत्यब्दान् स जीवति ।
वृषे शुक्रे गुरोरंशे पित्तवातादिरोगतः ॥ ३८ ॥

तत्रैवाराङ्कणयुते दशवर्षे मृतिस्त्रिके ।
मित्राङ्कणे शनौ रोगी वृषभे पञ्चविंशगः ॥ ३९ ॥

बलयुक्ते चिरायुश्च शुभदृष्टे तु सप्ततिः ।
रविमन्दाङ्कणे राहौ शुभयोगे फलप्रदः ॥
नो चेद्वाचकतां यातः पञ्चाशद्वत्सरे मृतिः ॥ ४० ॥

॥ इति अन्त्यकालनिर्णयः ॥

अथ सूक्ष्माङ्कणफलमुच्यते —

ताम्बूलं गमनं वस्त्रं भाषणं दन्तधावनम् ।
स्नानमौपासनं कोपं भोजनं भूमिजाङ्कणे ॥ १ ॥

वाणिज्यं कलहं निद्रा व्यवहारं शिवार्चनम् ।
दानं क्लेशं वदान्यत्वमुपवीतं बृहस्पतौ ॥ २ ॥

विद्या निद्रा सुहृद्वार्ता याचना योगचिन्तना ।
कुसुमं कुशलं वाद्यं धनसेवा बुधाङ्कणे ॥ ३ ॥

शिरोरोगं च हीनाङ्कं सुखमत्यन्तपीडनम् ।
राजभोगं नेत्ररोगं रणं शस्त्रं मृतिर्विधौ ॥ ४ ॥

भोजनं तीर्थयात्रा च शत्रुनिन्दा धनार्जनम् ।
कुरूपं सेवनं रोगमधिकाङ्कं बृहत्तनुम् ॥ ५ ॥

भिक्षाशनं दिनेशस्य स्वाङ्कणे नवधा कृते ।
मैथुनं कलहं वस्त्रं पतनं स्खलनं तथा ॥ ६ ॥

क्षौरं कण्डूयनं श्वासं जृम्भणं सैंहिकाङ्कणे ।
सौशील्यं बहुदारत्वं शुभमाभरणं रणम् ॥ ७ ॥

कारुण्यं निधनं निद्रा पटुत्वं कविरङ्कणे ।
ज्ञानयोगं कुवादं च शत्रुनिन्दा धनक्षयम् ॥ ८ ॥

रुजमुष्णं जलक्रीडा नीचसेवा ध्वजाङ्कणे ।
लेखनं राज्यभारं च व्यवसायं मनस्सुखम् ॥ ९ ॥

अल्पायुः कार्यहानिश्च देशान्तरगतिस्तथा ।
अपमृत्युश्च सल्लापं शनिरङ्कणजं फलम् ॥ १० ॥

अथ वाप्यादिनिर्माणम् ---

वापीकूपतटाकादि ह्यारामगृहभूमिषु ।
सप्तविंशतिनक्षत्रं त्रिधाकृत्य फलं वदेत् ॥ १ ॥

तथैव राशयः सर्वास्त्रिधा कुर्वन्ति पण्डिताः । (?)
अधोमुखासु नवसु वाप्यादीनि समारभेत् ॥ २ ॥

ऊर्ध्वदृष्टिषु सर्वेषु आरामादि समाचरेत् ।
ताराराश्यादि सर्वासु गृहशालादि निर्ममेत् (?) ॥ ३ ॥

मेषकर्कटके चैव मकरे कुम्भ एव च ।
वाप्यादि निर्ममेद्धीमांस्तेषां फलमथोच्यते ॥ ४ ।

अजारम्भे कुजे युक्ते गुरुणा सहिते यदि ।
पुरुषेण निधिं लब्ध्वा पश्चाज्जलनिदर्शनम् ॥ ५ ॥

कर्टके शनिना दृष्टे पुरुषेण जलं लभेत् । (?)
तथैवं बुधयुक्ते चेत् सप्तधा पुरुषेण तु ॥ ६ ।

स्वाङ्कणे शशियुक्तौ चेदमृतं भुवनं लभेत् ।
तदेवारयुतं दृष्ट्वा पाषाणसहितं भवेत् । ७ ॥

राहुकेतुयुतं लग्ने व्यर्थमेव भविष्यति ।
मकरे कुम्भराशौ च शशियुक्ते जलं भवेत् ॥ ८ ॥

गुरुयुक्ते वनं क्षुद्रमन्ययुक्ते जलं नहि ।
इदं सर्वं ग्रहैर्योगं स्वाङ्कणस्थैः शुभावहैः ॥ ९ ॥

मेषादिराशयः प्रोक्ताः कुजदृष्टिसमाहिताः ।
पूर्णार्धपादत्रितया लभते खनने सरः ॥ १० ॥

समदृष्टिषु सर्वेषु गृहारम्भमथोच्यते ।
लग्नं रव्यादि सिंहादि कुशलं तु तथोच्यते ॥ ११ ॥

भौमदृष्टेऽग्निदग्धत्वं राहुकेतू निरर्थकौ ।
बुधदृष्टेऽन्ययुक्तं स्यादन्यदृष्टं शुभावहम् ॥ १२ ॥

एतैर्दृष्टे स्वाङ्कणस्थेऽन्यैश्चेन्न फलं विदुः ।
ऊर्ध्वदृष्टिषु सर्वेषु गृहारामादिकं चरेत् ॥ १३ ॥

तत्र सप्तसु तारासु बाह्यारामादिकं चरेत् ।
गुरुचन्द्रयुते दृष्टे स्वाङ्कणस्थैर्ग्रहैरपि ॥ १४ ॥

अतिदीर्घतरो भूत्वा षष्टिवर्षाणि जीवति ।
मित्राङ्कणे स्थितैर्दृष्टे नवत्यब्दे स जीवति ॥ १५ ॥

अन्याङ्कणेस्थितैर्दृष्टे विंशत्यब्दे मरिष्यति ।
आरम्भे च प्रतिष्ठायां सुलग्ने शुभसंयुते ॥ १६ ॥

त्रयाणामपि कर्तव्यमन्यथा निष्फलं भवेत् ।
शन्याराराहुकेतुश्चेद्यजामानो मरिष्यति ॥ १७ ॥

सितचन्द्रौ यदा युक्तौ मनुष्यस्तस्य नाशकृत् ।
रविज्ञौ च यदा युक्तौ भृत्यानां मरणं भवेत् ॥ १८ ॥

एतैः स्युस्त्वङ्कणस्थैस्तु ह्यन्यस्था हि शुभावहाः ।
इत्येवं व्याघ्रपादेन समुदीरितमीरितम् ॥ १९ ॥

गृहप्रवेशयात्रायां बीजावापनसङ्गमे ।
अटलं शोधयेद्यस्त्वन्यमेतन्न शोधयेत् ॥ २० ॥

सूर्यादि गण्यते चन्द्रे नवभिर्भागमाहरेत् ।
नव त्रीणि चतुःपञ्च योगोऽयं खेचरं विदुः ॥ २१ ॥

इति व्याघ्रपादोक्तः नवग्रहसमयः समाप्तः

श्लोकानुक्रमणी

श्लोकाः	पृष्ठम्
अङ्कणे तु दिनेशस्य	७
अङ्कणे देवपूज्यस्य	३
,, ,,	२७
अजारम्भे कुजे युक्ते	४१
अतिदीर्घतरो भूत्वा	४२
अतीव रुष्टो	३
अथवा कटकांशः स्यात्	३७
अथवा मिथुनांशः स्यात्	३६
अथवा वृषभांशः स्यात्	,,
अथवा शनिरंशः स्यात	३७
अनुलेपनमाधत्ते	१८
अन्ययोस्तु यथाजातः	३७
अन्याङ्कणे यथाजातो	३८
अन्याङ्कणे स्थितैर्दृष्टे	४२
अन्त्ये गुरौ स्वाङ्कणस्थे	२६
अल्पायुः कार्यहानिश्च	४०
अष्टमाङ्कणगाः	२
अष्टमाङ्कणपः	१
अष्टमाधिपतौ पापे	२३
अष्टमे राहुभागे तु	२४
असिमादाय सूर्यस्तु	२१
आद्यङ्कणस्याधिपति	१
आयुःस्थानाधिपे केन्द्रे	२२
इन्दुजस्याङ्कणे	३
इन्द्रादिदैवतैः सार्धं	१५

श्लोकाः	पृष्ठम्
इयमेव चरी	२
उद्याप्य दशदानादीन्	३१
उपवीतं शशी धत्ते	१९
उपोष्य शुक्रवारे तु	३०
उपोष्य श्रवणं व्यग्रो	३१
ऊर्ध्वदृष्टिस्तु सर्वेषु	४१
एतेषु मध्ये	२
एतैः स्युस्त्वङ्कणस्थैस्तु	४२
एतैर्दृष्टे स्वाङ्कणस्थे	,,
कटके शशिना दृष्टे	४१
कण्डूयनं कामदमन्त्र	३५
कर्मपञ्चमलग्नेशाः	२८
कविः शोकेन सन्तप्तो	१५
कविराचमनं कुर्वन्	१६
कवेरङ्कणगे केतौ	१३
कवेरङ्कणगे जीवे	९
कवेरङ्कणगे भौमे	८
कवेरङ्कणगे मन्दे	११
कवेरङ्कणगे राहौ	१२
कवेरङ्कणगे सूर्ये	६
कवेस्तु वायवीयं तु	३३
कारुण्यं निधनं निद्रा	४०
कुजराहू यदि युतौ	१६
कुजशुक्रौ यदि युतौ	१४
कुजे तु स्वाङ्कणे	७

श्लोकाः	पुटम्
कुजे वाचस्पतेरंशे	७
कुजो नालं समादाय	२१
कुजो वाजिं समास्थाय	१८
कुटुम्बनाथे कुजसंयुते	२५
" "	३३
कुटुम्बस्थानगे राहौ	२५
कुरुते दोहनं भौमः	१५
केतुः सेचयते	२१
केतुज्ञौ यदि संयुक्तौ	२९
केतुशुक्रौ यदा युक्तौ	१९
केतुस्तु कुरुते मोदं	२०
केतोरङ्कणगे भौमे	८
केतोरङ्कणगे मन्दे	११
केतोरङ्कणगे सूर्ये	६
केत्वङ्कणगते चन्द्रे	७
केत्वङ्कणगते राहौ	१२
केत्वारौ षष्ठगौ	२४
क्षौरं कण्डूयनं श्वासं	४०
खादन् फलानि केतुस्तु	२०
खेदे जातो दरिद्रः	५
गुरुः शिल्पं समाहूय	२०
गुरावाद्यङ्कणे	९
गुरुकेतुयुतौ सूर्यो	२१
गुरुकेतू यदि युतौ	१५
गुरुचन्द्रौ यदि युतौ	१४
" " "	२०

श्लोकाः	पुटम्
गुरुज्ञौ यदि संयुक्तौ	२१
गुरुणा सहिते सूर्ये	२२
गुरुपङ्गू यदि युतौ	२१
गुरुयुक्ते वनं क्षुद्रं	४१
गुरुयुक्ते सिते	२१
गुरुरध्ययनं कुर्वन्	१६
गुरुर्दर्भं समादाय	१७
गुरुशुक्रज्ञचन्द्राणां	२८
गुरुशुक्रौ विवादेन	१५
गुरुशुक्रौ स्वभाव	४
गुरुस्तु कुरुते मोदं	१९
गुरोरङ्कणगे मन्दे	११
गुरोरङ्कणगे राहौ	"
गुरौ द्वितीयगे	९
गुरौ बुधाङ्कणे	"
गुरौ विषादयुक्तेऽपि	२६
गुर्वंशके ध्वजे	१२
गुर्वङ्कणगतो	२३
गुर्वारौ यदि संयुक्तौ	१७
गृहप्रवेशयात्रायां	४२
गोचरं पूर्वशास्त्रं	२
ग्रहाश्च सर्वे गुलिकेन	३३
चतुःपञ्चनवत्रीणि	३१
चतुर्णां खेचराणां वा	२८
चतुर्थमङ्कणं	२
चतुर्थाङ्कणपश्चन्द्रः	१

श्लोकाः	पृष्ठम्	श्लोकाः	पृष्ठम्
चन्द्रः क्षयं समास्थाय	१८	तत्रैवाराङ्कणयुते	३९
चन्द्रज्ञशुक्रगुरवो	१३	तथैव राशयः सर्वाः	४१
चन्द्रज्ञौ यदि संयुक्तौ	१४	तदा चत्वारि	२३
,, ,, ,,	१७	तदा जातः पितृद्वेषी	३९
चन्द्रमाः कुरुते मोदं	२०	तदा जातस्तु कन्यांशो	३७
चन्द्रमाः कुरुते यज्ञं	१८	तदा जातस्तु विज्ञेयः	३९
चन्द्रमाः शकटं प्राप्य	,,	तदा जातस्त्रिवर्षेण	२३
चन्द्रमाः शस्त्रजं वाक्यं	,,	तदा जातो माघमासे	३९
चन्द्रयुक्ते सिते	२२	तदा तु जातः	३८
चन्द्रांशके कुजे	८	तदा पञ्चाशदब्दे तु	,,
चन्द्राङ्कणे यदा जातो	३६	तदा मीनांशके	,,
चन्द्रारौ यदि संयुक्तौ	१४	तदा मेषांशको	३७
चन्द्रार्कौ यदि संयुक्तौ	,,	तदा वृषांशकं	३६
चन्द्रेण भानुर्यदि	१६	तदेव खलु	३
चन्द्रेण संयुते दृष्टे	३९	तनौ राह्वङ्कणे	२४
चन्द्रे भौमाङ्कणे जातः	६	तर्क्यते गुरुणा	२१
चन्द्रो महीजेन सह	१६	तस्य मेषांशकं	३६
छायासुताङ्कणे चन्द्रे	७	तस्मादुपरि	३१
छायासुताङ्कणे भौमे	८	तस्मिन् दिने तु	३०
जन्मप्रयाणे यदि	३३	तामसे वृषभांशः	३७
जातः पङ्ग्वङ्कणे	६	ताम्बूलं कुरुते	२२
जातकस्य फलं	३	ताम्बूलं गमनं	४०
जातस्तु पञ्चवर्षेण	३८	तारकाः सप्त	१
जायते तु स्त्रियः	३७	तासां संख्या	,,
ततः परं सुखी	३९	तिर्यग्दृष्टिस्तु	३५
तत्र सप्तसु तारासु	४२	तेषां तत्पूजकः	३०

श्लोकाः	पृष्टम्	श्लोकाः	पृष्टम्
तैललेपनमत्युष्णं	३५	नीचे सुधांशौ	४
तैलानुलेपं	३४	नीचो वा बिन्दु	६
तैलेन लिप्तो	१६	पङ्कोरङ्कणगे	१३
तौलीलग्नांश	३६	पङ्गुत्रङ्कणगते	१२
त्रयाणामपि	४२	पञ्च चत्वारि	२३
त्रीणि चत्वारि	२३	पञ्चमे पापमध्यस्थे	२८
दत्त्वा पत्न्यै	३१	पञ्चमे पापसंयुक्ते	२५
दरिद्राय च शान्ताय	३२	,, ,,	२९
दशदानादिकं	३०	पञ्चमे यदि	२८
दशांशं द्वादशांशं	३	पञ्चवर्षेण	३८
दशाविपाके	२	पञ्चसप्ततिवर्षेण	,,
दानारम्भः शुभं	३४	पदातिः पञ्चवदनो	४
दिनेशचन्द्रयोरेकं	१	पयःपात्रं	२०
दिनेशे स्वाङ्कणे	५	पापा वा यदि	५
,, ,,	६	पित्राधिकः	३
दीर्घवैरी सदा	४	पुत्रस्थानगते	२५
द्वात्रिंशदब्दजीवी	३९	पुत्रस्थानाधिपे	,,
द्वितीयचत्वर	२	पुत्रस्थाने शनौ	२६
धनुरंशः स विज्ञेयः	३७	पुत्रार्थी गुरुवारस्य	३०
ध्वजे कुजाङ्कणं	१२	पुराणं पुण्यकृद्देव	३५
ध्वजे तु स्वाङ्कणे	२३	पुराणं वदते सूर्यः	२०
नवनीतं रवेर्वारे	३०	पुष्पं मुदं	३५
नवमे शशिमन्दारा	२५	पूजां गुरुः	२१
नाटयन् गणिकां	१७	पूर्वरात्रौ	३०
निद्रायुक्ते सुतेशे	२६	प्रदोषव्रतमारभ्य	२९
निद्रालुता काल	३४	प्रशास्ति भृत्यान्	२२

श्लोकाः	पुटम्	श्लोकाः	पुटम्
प्रातरुत्थाय	३२	भूमिपुत्रस्तु	१९
बधिरश्चपलो	१४	भृगुजे गुरु	१०
बल्युक्ते चिरायुश्च	३९	भृगुर्दापयते	२१
बुधः पुस्तकमादाय	१७	भृगुर्दैत्यसभां	१७
बुधचन्द्रौ यदि	१४	भोजनं तीर्थयात्रा	४०
बुधभागे ध्वजे	१२	भौमः पङ्कजमादाय	२०
बुधशुक्रौ यदि	१९	भौमः पन्थानमास्थाय	१७
बुधराहू यदि	१८	भौमजीवौ द्वादशगौ	२५
बुधसूर्यौ यदि	१६	भौमदृष्टेऽग्निदग्धत्वं	४२
बुधस्तु वणिजां	१७	मदे बुधे	२६
बुधाङ्कणे कुजे	७	मदे गुरौ	२७
बुधाङ्कणे फणी	१२	मदे शनौ	२६
बुधाङ्कणे शशाङ्के	७	मदे शुक्रे गुरौ	,,
बुधे काव्याङ्कणे	९	मदे शुक्रे ध्वजे	२८
बुधे कुजाङ्कणे	८	मन्दवारे व्रतं	३२
बुधे केत्वङ्कणे	९	मन्दे कुजे	२६
बुधे चन्द्रांशगे	८	मन्दे जातस्तु	५
बुधे तु स्वाङ्कणे	,,	मन्दे बुधांशगे	११
बुधे रव्यङ्कणे	,,	मेषकर्कटके चैव	४१
बुधे राह्वङ्कणे	९	मेषलग्ने रवौ	३६
बुधे शन्यङ्कणे	,,	मेषादिराशयः	४१
बुधे सुरेड्यभागे	८	यत्रकुत्रापि च	१३
बुधो विलिख्य	१९	यत्र त्रयो वा	३३
भस्मोद्धूलित	१७	यदि जीवति	५
भिक्षाशनं	४०	यदि राह्वङ्कण	,,
भूमिजस्याङ्कणे	११	यात्रा ग्रहाणां यदि	३४

श्लोकाः	पृष्ठम्
यात्रा मृगाणामति	३५
ये सुधांशुयुताः	४
रन्ध्रे कुजे	२३
रविचन्द्रौ मेषगौ	३८
रविचन्द्रौ यदि युतौ	१४
रविज्ञौ यदि	१९
रविराहूयते शिष्यं	१५
रविस्तु कुरुते	१८
रविवारे ग्रहादीनां	३१
रविवारोदये	२९
रवेरङ्कणगे केतौ	१३
रवेरङ्कणगे देव	९
रवेरङ्कणगे भौमे	८
रवेरङ्कणगे मन्दे	११
रवेरङ्कणगे राहौ	१२
रवेरङ्कणगे शुक्रे	१०
राशीनां पूर्व	१
राहुः पीत्वा सुरां	१५
राहुः सुप्तोत्थितः	१९
राहुकेतुयुतं लग्ने	४१
राहुकेत्वपि कुर्वाते	२१
राहुर्मौनं	१७
राहुशुक्रौ यदा	१९
राहुश्च शासनं	२२
राहुश्चिन्तां	१७
राहोरङ्कणगे केतौ	१३

श्लोकाः	पृष्ठम्
राहोरङ्कणगे जीवे	९
राहोरङ्कणगे भौमे	८
राहोरङ्कणगे सूर्ये	६
राह्वङ्कणगते मन्दे	११
राह्वङ्कणे निशा	७
रुजमुष्णं जलक्रीडा	४०
रोगी सदाचार	३
लग्नं लग्नाधिपं	२
लग्नपञ्चमभाग्येश	२७
लग्नाष्टमव्ययेशानां	२२
लग्ने गुर्वङ्कणे	२७
लग्ने नवांशे	४
लग्ने राह्वार	२४
लग्नेशे कविरंशे	२७
लग्नेशे नीचभागस्थे	२२
लग्नेशे पञ्चमं	२५
लग्नेशे यदि	२८
लग्नेशो देव	,,
वदध्वमृषयो	३
वर्षमेकं प्रदोषे	३२
वस्त्रगन्धादिकं	३१
वाक्पतावष्टमे	२४
वाचस्पतेरङ्कणं	५
वाचस्पत्यङ्कणे	६
,,	२४
,,	२५

श्लोकाः	पृष्ठम्
वाणिज्यं कलहं	४०
वापीकूपतटाकादि	४१
विद्या निद्रा	४०
विधुजस्याङ्कणे	२४
विधोरङ्कगगे	६
,,	१०
,,	१२
विषूच्या मरणं	३८
वृषांश इति वा	३६
वैष्णवीं प्रतिमां	३२
व्यये राह्वङ्कणे	२४
व्याघ्रपादमहं	१
शनिः पत्रं समालिख्य	२०
शनिः शृणोति	,,
शनिकेतू यदि युतौ	१५
शनिचन्द्रौ यदि	१४
शनिज्ञौ यदि	१८
शनिरश्वं	,,
शनिराह्वाररवयो	१३
शनिशुक्रौ यदा	१९
शनिसर्पध्वजैर्युक्ते	१५
शनिसूर्यौ यदि	१३
शनौ नीच	२७
शनौ भौमाङ्कणे	११
शन्यंशकः	३८
शन्यङ्कणे रवौ जातो	६
शन्यङ्कणे रवौ लग्ने	२४
शशाङ्कभागे मन्दे	११
शशाङ्के तु ध्वजे	१२
शशाङ्के देव	७
शश्यङ्कणगतौ	२४
शास्त्रेषु वादं	१६
शिरोरोगं च	४०
शीतांशोरङ्कणं	३
शीतांशोरङ्कणे	९
शुक्रज्ञौ यदि	१८
शुक्रे षष्ठ	२६
शुभा बुधाङ्कणं	२५
शुक्रारौ पञ्चमे	२४
शुभग्रहैर्बलाढ्यस्तु	५
शून्यारौ यदि	२३
शृण्वन्तु परमं	२
शृण्वन्तु मुनयः	१
षष्ठाङ्कणगताः	२
षष्ठीव्रतं समारभ्य	२९
षोडशे विंशतौ	२३
संस्थाप्य कलशान्	२९
समदृष्टिस्तु	४१
सम्पूर्णबिन्दुयुक्ते	२
सम्भाषणं बन्धुभिरद्य	३४
सर्वारिष्टं ततः	३०
सर्वारिष्टं पुरस्तीर्त्वा	२९

श्लोकाः	पुटम्
सात्त्विके तु	३७
सात्त्विके वृष	,,
सिंहलग्नांशकः	३६
सिंहांशक इति	,,
सितकेतू यदि	१५
सितचन्द्रौ यदा	४२
सितस्य मन्त्रे	४
सिते ध्वजाङ्कणे	१०
सिते पङ्गवङ्कणे	,,
सिते तु स्वाङ्कणे	,,
सिते बुधाङ्कणे	,,
सिते भौमाङ्कणे	,,
सितांशके शशाङ्के	७
सुखस्थाने फणौ	२२
सुखेशे भृगुरंशे	२७
सुतत्रिकोणनेतारौ	२९
सुतरन्ध्रव्ययेशानां	२८
सुतस्थानाधिपे पापे	,,
सुतस्थानाधिपे मन्दे	२७
सुतस्य केन्द्राधिपतयो	२८

श्लोकाः	पुटम्
सुतेशे पापसंयुक्ते	२६
सुतेशे बलहीने तु	,,
सुतेशे व्ययराशिस्थे	२७
सुप्तोत्थितः प्रकुरुते	३४
सुरेड्ये केतुभागस्थे	१०
सुरेड्ये शनिभागस्थे	,,
सूर्यादि गण्यते	४२
सेतौ स्नात्वा	३२
सैंहिकेयाङ्कणे	१०
सोमवारोषसि	३१
सौम्याङ्कणे रवौ	६
स्वस्थस्तु कुरुते	३
स्वस्थाने तु	३३
स्वाङ्कणस्थे फणौ	१२
स्वाङ्कणे तु निशा	७
स्वाङ्कणे यदि जातः	३७
स्वाङ्कणे यदि मन्दे	११
स्वाङ्कणे शशियुक्तौ	४१
स्वोच्चेऽपि सुते	५
हरीतक्याश्चयं पीत्वा	२०